M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Sur. 445

Title: Chikitsha Kalika Tika

445

चिकित्सा कलिका टीका by
चंद्रट son of तीसट

Title	Chikitshā Kalikā Tikā
Author	Chandrata son of
Editor	Tishatā
Year, Vols.	Sam. 1849
Publisher	
Remarks	445

ॐ नमः श्रीगणेशाय ॥ ॥श्रीधन्वंतरये नमः॥ यं वेदांतविदो विदंति पुरुषं वेदात्मकं योगिनं सां
ख्याः स्वत्वविदो जयंति सततं यं पंचविंशात्मकं॥ बौद्धा बोधमयं यदक्षरमिदं ध्यायंति तेजः परं मन्त्र
भैः सततं करोतु विनवं वाचः परं मेश्वरं। तीसटसूनुर्नत्वा चंद्रटनामा भिषग्गणं तस्य रणे।
नत्वा पितुश्चिकित्साकलिकाया विवरणं प्राह॥ व्याख्यातरि हरिश्चंद्रे श्रीजैज्जटनाम्नि मुनौ वीरे
चास्मिन्नप्यायुर्वेदे व्याख्याक्षयं समावहति॥ धर्मार्थकाममोक्षपाराः सर्वैरेव मनुष्यैः शरी
रारोग्याय महान्प्रयत्नः कर्तव्य इत्युक्तं हि चरकाचार्येण॥ धर्मार्थकाममोक्षाणामारोग्यं
मूलमुत्तमं॥ रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य चेति॥ तच्चायुर्वेदशास्त्रं सम्यक्परिज्ञान नी॰टी॰
पूर्वकं। यस्मादिदमसम्यक्परिज्ञानमनर्थाय॥ सम्यक्विदितं च महद्गुणाय संपद्यते॥ तथाचो १
क्तं चरकाचार्येण। यथा विषं यथा शस्त्रं यथाग्निरशनिर्यथा। तथौषधमविज्ञातं विज्ञातममृ

तोपमं तस्माद्यथावदर्थपरिज्ञाय व्याख्यानश्रवणे महान्प्रयत्नः कार्यः। इत्यतः आयुर्वेदांग
गतायाः अष्टांगयोगमालायाश्चिकित्साकलिकायाः व्याख्या प्रस्तूयते। सा च षड्विधा। तथा चोक्तं। उपोद्घा
तः पदं चैव पदार्थः पदविग्रहः। चालना प्रत्यवस्थानं व्याख्यानं तत्र षड्विधा॥ तत्र उपोद्घातः शास्त्र
समुत्थानसंबंधाभिधेयप्रयोजनानि। तदनेनाप्युक्तं। वितांत्रज्ञतिसिद्ध्यर्थमुपोद्घातं प्रचक्षत इ
ति। तत्रास्यायुर्वेदस्य संबंधो गुरुपर्वक्रमलक्षणः स्वयमेव सुश्रुताचार्यप्रभृतिभिरुपदर्शितः।
तथा चोक्तं सुश्रुते। ब्रह्मा प्रोवाच॥ ततः प्रजापतिरधिजगे। तस्माद्दश्विनौ। अश्विभ्यामिंद्रः। इं
द्रादहं। मया चेह प्रदेयमर्थिभ्यः प्रजाहितहेतोरित्यादौ शास्त्राभिधेयं। पुनः शल्यादीन्यष्टावंगानि॥
पुरुषार्थादिचतुष्टयं वा प्रयोजनं तु। व्याधिपरिमोक्षः स्वस्थरक्षणं चेदमासन्नं। विप्रकृष्टं धर्मा
र्थमोक्षः इत्येवं चिकित्साकलिकायाः परविघ्नविनाशनार्थं नमस्कारमाह इत्यध्यकारास्त्रास्त
×का।

॥गुरवे कुल्या॥गुरौ मे [illegible] लेमानस्यघावेकस्या पोबहुवचास्यात्॥युवां गुरू॥यूयं गुरव॥मयमे [illegible]॥एतेमे पित
पादा नित्यमपि पूज्यावात्॥२

यश्चिधन्वंतरिसुश्रुतादीन्नत्वा नमस्कृत्य पितुश्च पादान्नौकृतां चिकित्साकलिकेति योगमा
लामरोजैरिवतीसटेन॥ग्रंथत्रोतीसटेन योगमालाकृते तिक्रियापदं॥किंकृत्वा॥नमस्कृत्य॥
कथानत्वा॥कान्यद्यश्चिधन्वंतरिसुश्रुतादीन्यथ पक्षे अश्विनौ च धन्वंतरिश्च सुश्रुतश्च ते च
यश्चिधन्वंतरिसुश्रुता ते आदौ येषां ते तथा॥आदि ग्रहणेनोपधेनवौरभ्रपौष्कलावतान्ने
याग्निवेशचरकप्रभृतीनां ग्रहणं॥अस्मिंश्च श्लोके ब्रह्मप्रजापत्याश्विनिंद्रादिदेवर्षिप्रमाने रपि यत्
मार्यादीनां नमस्करणं तत्प्रज्ञा पूर्वकारित्वं ग्रंथकर्तुः ख्यापयति॥तथा च आदौ पयनमस्का ती॰टी॰
रःशारीरारोग्याय॥उक्तं च॥आरोग्यं भास्करादिछेन्मुक्तिमिछेज्जनार्दनात॥ईश्वरात् ज्ञानमिछे
द्धनमिछेद्धुताशनात॥तथा कुलदेवतास्माकमिति॥कुलदेवतात्वं तु तत्रेजः समुत्पन्नत्वा २
न्पश्चयानंतरमश्विनोर्नमस्करणमायुर्वेदाधिकत्वानावबोधकं॥तथा चोक्तं॥अश्विनौ देवभि

षजाविति॥तदनंतरं धन्वंतरेर्नमस्करणं अधिकृतमेतस्यादावारोग्यप्रज्ञा स्त्रे धन्वंतरेरनंत
रं सुश्रुतादीनां तद्विष्याणामायुर्वेदकर्तॄणां नमस्कारः तदनु आयुर्वेदाद्धिप्रतरणपोतपात्राणां
पितुःपादानां नमस्कृतिरित्यनेन क्रमेण नमस्कारं कृत्वा योगमालानामकथनं॥चिकित्साक
लिकेति॥चिकित्सायाः कलिका चिकित्साकलिका कलिकेव कलिका यथा पुष्पकलिका विहून
पत्रकेसरातीव्रभूतं गंधमोदव्यापका॥एवं चिकित्साकलिका प्यधिचिकित्सामोद
वेदका॥कैरिव योगैर्मालाकृता॥परोगैः पद्मैरिव मालाकारप्रति॥एवं योगेर्मालाकृतेत्यर्थः॥अत्र
यंकिंविशिष्टै रित्यत आह॥हारीतसुश्रुतपराशरभोजभेडभृग्वग्निवेशचरकादिचिकित्सितो
क्तैः॥एभिर्गणैः सगुणवद्भिरतिप्रसिद्धैः क्षीत्वंतरीयरत्नाकविरमपंचैः॥हारीतश्च सुश्रुतश्च प
राशरश्च भोजश्च भृगुश्च अग्निवेशश्च चरकश्च हारीतसुश्रुतपराशरभोजभेडभृग्वग्निवेशचर॥

कां॥ तत्र आदिर्येषां ते॥ तथा॥ आदिग्रहणात्तु विंतरणैरत्रपुष्कल्यवत्तदा र पाणिजानूकर्णचिबुकघ्रे
ण विदेहनिमित्तप्रवृत्तयोगृह्यंते॥ तेषां चिकित्सितं तदुक्तं॥ एभिरिति वक्ष्यमाणकैर्योगिगणैश्च॥ किं
विशिष्टैः गुणवद्भिः रतिप्रसिद्धैश्च॥ गुणाः विद्यंते येषां ते गुणवंतः तैर्गुणवद्भिः॥ गुणवद्भिश्चैषां प्रागेवारोग्य
संपादनात्॥ अतिप्रसिद्धैः प्रख्यातैरिति॥ अतिशयेन प्रसिद्धाः अतिप्रसिद्धास्तैरतिप्रसिद्धैः॥ अतिप्र
सिद्धत्वं तु पारंपर्याविच्छेदस्मरणात्॥ अतिप्रसिद्धैः प्रख्यातैरित्यर्थः॥ पुनरपि तत्र एव विशेष्यंते॥ अत्रैव
तन्य रचनारुचिरस्वपंचैर्योगिगणैश्च॥ अत्रैव तदेरिमे अत्रैव तरीया॥ अन्यात्रेषां रचना सम्यक्करणं तया
रुचिरः शोभनः प्रपंचो येषां ते तथा॥ प्रकर्षेण विवेचनमिति॥ ॥ इदानीं स्वर्वोक्तेन प्रकारेण विशि तो०टी०
ष्टैर्योगैर्योगमालां तनोति॥ तस्याः सदसद्वेद्यादरकथनार्थमाह॥ ॥ अल्पश्रुतमपि भिषजं किल मुग्ध ३
तादिशात्मोदधौ मतिरबोधदत्प्रमूढा॥ अस्माद्विधयथितयोगमनुच्चयेतु बध्नाति बुद्धिमबुधः पुनिष

गरोवाशबुद्धिंबध्नातीति क्रियाकार॥ अस्माद्विधयथितयोगमनुच्चये अस्माद्विधै
रित्येतन्निंदास्तुतिपरं वचनं॥ ग्रथितः सुश्लिष्टः रचितो योगसमुच्चयो तस्मिन्॥ अबुधः अपंडितो बध्ना
ति बुद्धिं तु शब्दः अत्र निपातो ह्यवधार्थे द्रष्टव्यः॥ नानाप्रकारेष्वर्थेषु निपतंतीति निपाताः॥ यस्मादबुधः
स्वल्पश्रुतो भवति॥ स्वल्पं स्तोकं श्रुतं येन स तथा॥ तस्य इष्टं तु तमपि भिषजो वैद्यस्य किल यामति॥
किलेति वार्तायां संभावयति॥ भावअबोधेन अवन वगमनेन दृढं अतिशयेन प्रमूढा॥ विचिंतार
विचारणाक्षमेति यावत्॥ कस्मिन् मुग्धतादिशात्मोदधौ मुग्धता हीनां शास्त्रं मुग्धतादिशास्त्र
॥ तदुदधिरिव अर्थगांभीर्यात्॥ तस्मिन्नमो विचारणाक्षमेति तत्वात् अस्माद्विधविरचिते स्तोकयोग
समुच्चये तु बध्नाति बुद्धिं अबुधः इति निंदा॥ पुनिः पुरोवा बुद्धिमाबध्नाति॥ ज्ञानेनाति भिषजः सु
भिषजस्तेषां वरः श्रेष्ठः॥ सयस्मात् मार ग्राह्य॥ अस्माद्विधैः संग्रहपरैरायुर्वेदोदधिनिमग्नयोगरत्ना

करणत्वं पटे वीरणवितैर्योगसमुत्थयेवध्यातिबुद्धिमतिमितिम्मुनिः॥७॥ इदानीं सकलायुर्वेदाधि
ष्ठानभूतस्यास्य देहस्य कर्मनिबद्धस्य कर्मपरुषस्य शरीरं व्याधिरव्याचुराह॥८॥ यद्भूपयःशिखि
समीरवियद्भिरेभिर्भूतैर्गुणैरपि च सत्त्वरजस्तमोभिः॥ वृंदोषधातुमल मर्मसिराशिराधि
व्याप्तं वपुस्त्वनुवृत्तामिदमत्र रोगाः॥ यद्वपुस्त्वनुवृत्तं व्याप्तं॥ अत्र रोगाः संभवंतीतिक्रिया॥ के
व्याप्तं॥ एभिर्भूतैः॥ कतमैः॥ भूपयःशिखिसमीरवियद्भिः॥ भूश्च पयश्च शिखी च समीरश्च विय
च्चेतानि तथा तैर्व्याप्तं॥ व्याप्तं वपुस्तन्मयं पंचभूतविकाररूपं॥ तथाचोक्तं चरकाचार्येण॥ गर्भस्तु
खल्वंतरिक्षवाय्वग्नितोयभूमिविकारश्चेतनाधिष्ठानभूत इत्यादि॥ तद्गुणत्वं पंचमहाभूतगुणो
पलक्षितः॥ तथाच चरकाचार्यः॥ खरद्रवचलोष्णत्वं भूजलानिलतेजसां॥ आकाशस्याप्रतीघातो लिं
गमुक्तं यथाक्रमं॥ न केवलं भूतैर्गुणैरपि यद्वपुर्व्याप्तं॥ गुणबाहुल्यादिति निर्दिष्टा सत्त्वरजस्तमोभिः॥

मा॰टी॰ ४

॥सत्त्वं च रजश्च तमश्च सत्त्वरजस्तमांसि तैः सत्त्वरजस्तमोभिः सैर्व्याप्तं तन्मयत्वं तद्गुणत्वं॥ तथाच
शारीरे सुश्रुताचार्यः॥ तन्मयान्येव भूतानि तद्गुणान्येव वादिशेत्॥ तैश्च तैर्लक्षणैः कृत्स्नो भूतग्रा
मो व्यज्यते॥ तन्मयत्वं गुणैः कारणकार्यत्वेन सर्वेषामेव भूतानां॥ तथाचोक्तं शारीरे सुश्रुता
चार्येण॥ सत्त्वबहुलमाकाशं॥ रजोबहुलो वायुः॥ सत्त्वरजोबहुलोऽग्निः॥ सत्त्वरजस्तमोबहुला आ
पः॥ तमोबहुला पृथिवी॥ इयं कारणभूतव्याप्तिः॥ कार्यभूतव्याप्तिरपि सुश्रुतेनैवोक्ता॥ आंत
रिक्षास्तु शब्दः शब्देंद्रियं सर्वछिद्रसमूहो विविक्तता च॥ वायव्यास्तु स्पर्शः स्पर्शेंद्रियं सर्वचेष्टास
मूहः सर्वशरीरस्पंदनं लघुता च॥ तैजसास्तु रूपं रूपेंद्रियं वर्णः संतापो भ्राजिष्णुता पक्तिरमर्षस्तै
क्ष्ण्यं शौर्यं च॥ आप्यास्तु रसो रसनेंद्रियं सर्वद्रवसमूहो गुरुता शैत्यं स्नेहो रेतश्च॥ पार्थिवो गंधो गंधेंद्रियं
सर्वमूर्तसमूहो गुरुता चेति॥ तद्गुणत्वं भूतानां॥ सात्त्विकास्त्वानृशंस्यं संविभागरुचिता तिति

त्मा मतं धर्मास्तिक्यं ज्ञानं बुद्धिर्मेधा धृतिः स्मृतिरनभिषंगश्च ॥ रजसा ऽ दुःखशीलत्वं । अटनशीलता
अधृतिः । अहंकारो ऽनृतत्वं । अकारुण्यं दंभो मानो हर्षः कामः क्रोधश्च ॥ तमसा विषादित्वं नास्तिक्य
मधर्मशीलता बुद्धिनिरोधो ऽज्ञानं दुर्मेधस्त्वमकर्मशीलत्वं निद्रालुत्वं चेति । न केवलं गुणा व्याप्नुव
न्ति दोषधातुमलमर्मसिरादीनि च व्याप्नुवन्ति । त्वगादि व्याप्तिश्चैतेन व्यस्थितिः । त्वचश्च दोषाश्च धात
वश्च मलाश्च मर्माणि च सिराश्च । त्वग्दोषधातुमलमर्मसिरा आदिर्येषां ते । तथा । आदिग्रहणात् क
लाशयपेशीस्नायुसंधिधमनीप्रभृतीनां ग्रहणं ॥ तथा चोक्तं सुश्रुते । त्वचः सप्त कलाः सप्त आश
याः सप्त सप्त सिराशतानि पंच पेशीशतानि नव स्नायुशतानि त्रीण्यस्थिशतानि द्वे दशोत्तरे सं
धिशते सप्तोत्तरं मर्मशतं । चतुर्विंशतिर्धमन्यः । त्रयो दोषास्त्रयो मलाः नव स्रोतांसि समास
तो व्याख्यातं वपुः शरीरं । पंचमहाभूतशरीरिसमवायः । केषां तनुभृतां । तनुः शरीरं बिभ्रति ये ते त

नी०टी०
५

नुभृतः । कर्मजदुःखात्मकेषां । इदं । एतत्सर्वोक्तप्रकारेण पंचमहाभूतगुणं त्वक्धात्वादि व्याप्तं । यत
त्र रोगाः भवंति । रोगाः प्रजायंते । अत्र इत्यधिकरणत्वेन विनिर्दिशति । तथा चोक्तं सुश्रुते । नास्त्र
स्मिन् क्रिया सोऽधिष्ठानं इत्यादि रोगा दिरोगा इति । सामान्येन जातिनिर्देशः । ते न शारीरागं
तुमानसस्वाभाविकभेदभिन्नाश्चतुर्विधा अपि गृहीताः । तथा चोक्तं सुश्रुताचार्येण । ते चतुर्विधा
॥ आगंतवः शारीरा मानसाः स्वाभाविकाश्चेति । शारीरा ज्वरकुष्ठाद्याः क्रोधाद्या मानसाः स्मृताः । आगं
तवोऽभिघातोत्थाः सहजाः क्षुत्तृडादयः ॥ तथा आदिजन्मदोषकालसंघातदैवस्वभावमलप्रवृत्ता
॥ सप्तविधास्ते ते च सुश्रुते नोक्ताः । वक्ष्यमाणाश्च वातादिभेदेन ते सर्वत्र वपुषि रोगा भवंतीति ॥ अ
थ कायरोगो नाम कर्मदुःखसमुदायः स्वसंबं धः । तथा चोक्तं सुश्रुते । तदुःखसंयोगा व्याधय
इत्युच्यंते । तथान्यैरप्युक्तं । विकृतदोषदूष्यसमवायो विकारः । तथा च चरकः । विकारो धातुवैष

स्यमाम्यं प्रवृत्तिरुच्यते। सुखसंज्ञकमारोग्यं विकारो दुःखमेव च। रोगा व्याधयः। तथा च चरकः। तत्र
व्याधिरामयो गद आतंको यक्ष्मा ज्वरो विकारो रोगः इत्यनर्थांतरमिति॥३॥ सांप्रतं ये चतुर्भेदनिर्द्दिष्टाः स्मन्ने
दनिर्द्दिष्टाश्च सर्वव्याख्याता विकाराः। तेषां वातादिवैषम्येन त्रैविध्यमादिनेदर्शयन्नाह॥४॥ ते वातपित्त
कफजास्त्रिविधा द्विधा वा कायेमनस्यपि च संत्यपरे नराणां। साध्याः क्वचित् क्वचिदपि प्रभवंति याप्या
:केचित्क्वचित्तु नरसाध्यतमाः प्रदिष्टाः॥५॥ तेऽस्मिन्निति तद्गुणोच्यते दोर्नित्यमभिसंबंधः इति। येन सर्वामनेक
भेदनिर्द्दिष्टा व्याख्याता विकाराः। ते सर्वे वातपित्तकफजाः संति। भवंति। वातश्च पित्तं च कफश्च वातपित्त
कफास्तेभ्यो जाता वातपित्तकफजाः। ते चानुबंध्यानुबंधकभेदेन। उक्तं च। स्वतंत्रो व्यक्तलिंगो यथो
क्तसमुत्थानप्रशमो भवत्यनुबंध्यः। तद्विपरीतलक्षणश्चेत्यनुबंधकः। त्रिविधास्त्रिप्रकाराः। तथा
च चरकः। त्रिविधा व्याधयो भवंत्याग्नेयसौम्यवायव्याः। न केवलं त्रिविधाः। द्विधा च संभवंति। राज

नि०टी० ६

×दुःखसाध्यं×५

मतामसभेदेन। तथा चात्रेयः। द्विविधाश्चापरे राजन् साध्यासाध्याश्च। तु नरधिष्ठानभेदेन द्वैविध्यं प्रति
पादयन्नाह। कायेमनस्यपि च संत्यपरे नराणां। काये शरीरे। मनसि च सत्वसंज्ञके। अपरे भवं
ति नराणां प्राणिनां। तथा च सुश्रुताचार्यः। त एते मनःशरीराधिष्ठानाः। पुनरप्यन्यत् साध्ययाप्य
प्रत्याख्येयभेदेन त्रैविध्यं प्रतिपादयन्नाह। साध्याः क्वचिन्मनादिविमुक्ते काये सिध्यंति। द्विविधं साध्य
माह॥ सुखसाध्यं च। क्वचिदपि शरीरे याप्याः प्रभवंति। याप्यमपि द्विविधं। याप्यमनुपक्रम्यं चे
ति। ननु कथं व्याधीनामनेकभेदकथनमुच्यते। शिष्यमतिविकाशार्थं। आचार्यास्तु तथा शास्त्रं विद
धति। यथा शिष्याः सुखेन संबिभ्रति। तथा च चरकः॥ भेदाद्विभेदमन्यथा त्रिनत्रि। तु रस्मात्त्रित्वं
भेदं प्रवृत्तं चरितं॥ ...... शिष्या विशेषमापादयत्यनेकधा। न च सर्वभेदा यमुपसंतीति॥६॥
प्राक्साध्याः क्वचिदित्युक्तं॥७॥ एकैकदोषजनितानिरुपद्रवाश्च दीप्तानलस्य च सहात्मवतश्च

७२

कै×३ नविरंस्र

जंतोः॥ विज्ञातस्य च रुजः सदुपक्रमेण साध्या भवंति भिषजामविरोद्रवाश्च॥६॥ भिषजां स
दुपक्रमेण रुजः साध्या भवंतीति क्रियाः॥ किं विशिष्टा रुजः॥ एकैकदोषजनिताः॥ निरुपद्र
वाश्च॥ एकैकेन दोषेण जनिता एकदोषजनिताः॥ प्रादुर्भूता इत्यर्थः॥ निरुपद्रवाश्च॥ निर्गता
उपद्रवा ज्वरातिसारश्वासकासतृष्णादिहिक्काप्रभृतयो यासां ता॥ निरुपद्रवाः॥ ताश्च अवि
रोद्रवाः॥ स्तोककालोद्भवाः॥ प्रादुर्भूता रुजः॥ किंच॥ दीप्तानलस्य च॥ दीप्तः प्रदीप्तोऽनलो जाठ
राग्निर्यस्य॥ प्रदीप्तानलो जंतुस्तस्य॥ सदा सर्वकालं आत्मवतश्च आत्मनो हितस्य च॥ विज्ञावि
तस्य विज्ञैर्नरद्वेण अविज्ञातस्य युक्तस्य॥ जंतोः प्राणिनो रुजो विकारा यदि न भवंति॥ तदा सदु
पक्रमेण सम्यक्प्रयोगेण साध्या भवंति॥ केषां भिषजां सुवैद्यानां॥ तथा च चरकाचार्यः॥ प्र
योगज्ञानविज्ञानसिद्धिसिद्धाः सुखप्रदाः॥ जीविताभिसरास्ते स्युर्वैद्यत्वं तेष्ववस्थितं॥७॥ कवि

नी०टी०
१

दपि याप्या भवंतीत्येतदुक्तं॥ प्राकृतयाप्यत्वं प्रतिपादनायाह॥८॥ ये यावदेव भिषजामगदप्र
योगास्तावत्प्रशांतिमुपयांत्यगदैर्विना ये॥ प्रादुर्भवंति च पुनः सहसाद्विदोषास्ताहग्विधाः स्फुरिति
याप्यतमा गदा स्युः॥९॥ ते गदा याप्यतमाः स्युर्भवेयुः॥ ये यावत्कालमेव भिषजामगदप्रयोगा
औषधकरणं॥ तावत्प्रशांतिमुपयांति॥ उपशमं गच्छंति॥ अगदैरौषधैर्विना ये पुनः पश्चा
त्प्रादुर्भवंति॥ सहसा शीघ्रं॥ द्विदोषाः॥ द्वाभ्यां दोषाभ्यां संभवंतीति द्विदोषाः॥ ताहग्विधा इ
त्यनेन प्रकारेण याप्यतमा॥ अतिशयेन याप्या गदा रोगा इति॥१०॥ इत्थं केचिदसाध्यतमाः प्र
तिदिष्टा रोगास्तान् प्रतिपादयन्निदमाह॥११॥ ये कर्मजाः संभवंति शरीरिणां ये ये च त्रिदो
षचयजाः स्थिरकालजाश्च॥ सोपद्रवास्तु तनधनस्य च ते गतायो रुजा गदा गदवतामगदैरगम्या
॥१२॥ ते गदा अगदैरौषधैरगम्याः॥ ये कर्मजाः प्राक्तनकर्मणो जाताः संभवंति शरीरिणां यो शरीरं

विद्यते यस्य स भवति शरीरीति। तद्गुणसंविज्ञानबहुव्रीहिः। श्रवणात्। शारीरस्य शारीरिणां स
दैककालं निष्पद्यंते। नेवादिबलप्रवृत्ताः जन्मबलप्रवृत्ताश्चेति। ये च त्रिदोषजाः। त्रयाणां दोषाणां
च यस्मात् जाताः। त्रिदोषचयजाः। चयसंहतिरूपा वृद्धिर्दोषाणां। चिरकालजाश्च। चिरं दीर्घकाले
जाताः। दीर्घकालजाः। सोपद्रवाः। ये महोपद्रवैर्ज्वरादिभिर्वर्त्तन्ते इति सोपद्रवाः। च्युतधनस्य। ये ध
नरहितस्य गतायुषो विनष्टायुषे ते सर्वे गदागदवतां रोगवतां उग्राः क्षीणमरणात्मकाः। त
अगदैरौषधैरगम्या न साधनीया भवंतीति॥ एवं साध्ययाप्यप्रत्याख्येयप्रकारेण त्रैविध्यं प्रति
पाद्येदानीं दैवपुरुषकारौ पृथक् संयुक्तौ जनकौ सर्वव्याधिनामित्यनेन प्रपंचेनापरं त्रैविध्य
प्रतिपादनाय परमभवोच्चता। कर्मप्रकोपेण कदाचिदेके दोषप्रकोपेण भवंति चान्ये। तथापरे प्राणि
षु कर्मदोषप्रकोपजाः। कायमनोविकाराः॥ एके कायमनोविकाराः कर्मप्रकोपेण भवंति। अथ

नी०टी०
८

किमिदं कर्म। तस्य च प्रकोपः। कीदृक् तदुच्यते। अन्यजन्मकृता क्रिया दैवाख्या कर्मेत्युच्यते। तस्य क
र्मणः प्रकोपः कर्मप्रकोपः। स्वपाकफलोद्रेकिता। इत्थंभूतेन कर्मप्रकोपेण कदाचित् कस्मिंश्चित् का
ले भवंति। न केवलं कर्मप्रकोपेण। दोषप्रकोपेण भवंत्यन्ये। दोषाणां वातादीनां पुरुषकारजनित
मिथ्याहारविहाराभ्यां प्रकोपः। प्रकोपशब्देन विलयनरूपा वृद्धिर्दोषाणामुच्यते। अन्ये सर्वमस्मा
द्विलक्षणरोगा दोषप्रकोपेण भवंति। तथापरे प्राणिषु कर्मदोषप्रकोपजा विकारा भवंति। अपरेऽन्ये
प्राणिषु कर्मपुरुषेषु कर्मदोषप्रकोपजाः। यदा कर्मदोषौ समौ प्रकुप्यतः। तदा कायेमनसि च वि
काराः सर्वोत्थाः सर्वे भवंति। तथा च चरकः। दैवमात्मकृतं विद्यात् कर्म यत्पौर्वदैहिकं। स्मृतः पुरुषकार
स्तु क्रियते यदिहापरं। बलाबलविशेषोऽस्ति तयोरपि च कर्मणोः। दृष्टं हि त्रिविधं कर्म हीनं मध्यममुत्तमं।
दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते। दैवेन चेतरत्कर्म विशिष्टेनोपहन्यते। निर्दिष्टं दैवशब्देन कर्म

यत्सर्वदेहिकं। हेतुस्तदेवकालेन रोगाणामुपजायते॥ नहि कर्ममयं किंचित्फलं यस्य न भुज्यते।
स्तयस्त्रैकर्मजा रोगाः प्रशमं यांति तत्क्षणात्॥ तथा च सुश्रुतेप्युक्तं। कर्मजा व्याधयः केचित् दो
षजाः संति चापरे॥ कर्मदोषोद्भवाश्चान्ये कर्मजास्तेषु हेतुकाः॥ इत्यादि॥ ७॥ कर्मविपाकेपि एवं प्रती।
त्युक्तं। प्राकृकेवलकर्मविपाकेपि एव वंति येतान् विकारानाह॥ ८॥ जठरगुदजोन्मादापस्मृत्यसृक्
कृतिपंगुताः कृतिविकलता वाग्विकल्पप्रमेहभगंदराः॥ प्रदरपवनव्याधिश्वित्रत्वक्क्षयलक्षणदांध
ता॥ तिमिरवदनघ्राणशोषश्वयथ्वपचीव्रणाः॥ १०॥ वल्मीककाकणकखांखककुंडरीकरक्तार्बुदव्र
णविसर्पवपुः प्रकंपाः। पक्षाभिघातगलगंडगलग्रहाश्च दंडापतानकसमीरणशोणिताद्याः॥ ११॥ वी०टी०
इत्यामयाः स्फुरपरप्रविणापहारगुर्वंगनागमनविप्रवधादिनिर्योः। कर्मभिरत्रानुसृतामिह क ९
र्मजाख्ये तोपक्रमेण नियतामुपयांति सिद्धिं॥ १२॥ इहते कर्मजा रोगा येड। कर्मभिरनुसृतां जठरा

दयो भवंति॥ जठरादीनामितरेतरद्वंद्वः समासः॥ जठरमुदरं। गुदजान्यर्शांसि। उन्मादो मनो
विकृतिः। अपस्मृतिरपस्मारः। असृक्कृच्छ्कृतिः रक्तपित्तं। पंगुता सक्थ्नोर्बंधः। कृतिविकलता बा
धिर्यं। वाग्वैकल्यं मूक त्वं। प्रमेहः प्रकर्षेण मूत्रक्षरणं। भगंदरो गुदाभ्यासे व्रणः। प्रदरः स्त्रियाम
ः तावपिच्छा तर्वप्रवृत्तिः। पवनव्याधयो महावातरोगाः। श्वि देपकापतानादि तत्प्रवृत्तयः। श्वित्रं
किलासं। त्वक्क्षयः शोषः। लक्षणदांधता राज्यंधत्वं। तिमिरं दृष्टिनाशः। वदनघ्राणशोषौ मुखनासाशुष्कता
मानि। श्वयथुः सर्वंपरः शोफः। अपची व्रणो गंडमाला व्रणः। वल्मीको वल्मीकाकारो ग्रंथिबद्धव्रणः।
काकणककाकुनंतिका कारं महाकुष्टं। खांखकः शिरोरोगः। पुंडरीकं पद्मवर्णं महाकुष्टं। रक्तार्बुदं रक्त
स्राविमांसपिंडो। व्रणविसर्पः क्षतविसर्पः। वपुः प्रकंपः सर्वशरीरचलनं। पक्षाभिघातः पक्षवधः। ग
लगंडो गले पुष्पाकारः श्वयथुः। गलग्रहो गलेऽन्नपाननिरोधः। दंडापतानको दंडवत्स्तंभः। समीर

णशोणितं वातरक्तं॥ आदिग्रहणेन संनिपातविलंबिकादिका श्वासकासातीसाराश्मरीमूढग
र्भादीनां ग्रहणं॥ इत्यामयाः स्युरिति। इतिशब्दः प्रवर्तकादीनां परामर्शकः। आमया रोगाः स्युर्भवेयुः
दुःकर्मभिः पापकर्मभिः। कैः। अपरद्रव्यापहार गुर्वंगनागमन विप्रवधादिभिः। अपरद्रव्यापहारः परस्वहरणं। गुर्वंगनागमनं गुरुपत्नीविध्वंसः। विप्रवधो ब्राह्मणवधः॥ आदिग्रहणेन पंच
महापातकोपपातकानि गृह्यंते। एभिर्दुःकर्मभिरनुष्ठितैः शारीरवृत्ता ये रोगाः संभवंतीह लोके
ते कर्मजाः॥ नोपक्रमेण भिषजामुपयांति सिद्धिं॥ भिषजां वैद्यानां संशोधनसंशमनादिना क्रिय
योपक्रमेण युक्तिव्यपाश्रयेणेनो सिद्धिं न साध्यत्वमुपयांति। प्राहुर्वदंतीति। कर्मजत्वं चैषां दृष्ट्वा शा नि०टी०
स्त्रांतरेषु तीसटाचार्येणोक्तं। तथा च तंत्रांतरं। अत्र त्वापावनं ये तु प्राप्नुवंतोऽंत कुरुयं। तेषां १०
कर्मानुसारेण व्याधिः समुपजायते। तत्त्वाद्यमध्यपादं वा किंचिन्न मयापि वा॥ साध्यमसाध्यमन्य

थायाप्याश्चामयाः संभवंतीति॥ महांति यानि कर्माणि विशालं तेषु कीर्तितं। लघून्येव मितोदि
ष्टप्रायश्चित्तमविस्तरं। ब्रह्मस्त्रीकृतनराणां वधश्चौर्यादनृततः। अगम्यगमनात्तेषां संयोगात्तै
ःष्टषकृष्टषकृ। महातिपातकान्याहुर्दृष्टादृष्टविशारदाः। पुनर्जन्मांतरप्राप्तिफलं तेषां प्रकीर्तितं।
उपयोगात्तद्युक्तस्य नान्यथा संप्रकीर्तितः। चिकित्सकाः वदंत्येके धर्मशास्त्रविदो जनाः। तस्माच्चि
कित्सितं कार्यं जन्मांतरविशुद्धये। कुष्ठादिषु वदंत्येके नूयोजातेऽपि मंत्रवान्॥ कुष्ठमेहोदरश्वित्र
क्षयोन्मादभगंदराः॥ अन्येऽपि दुर्निवाराः स्युर्व्याधयो ये प्रकीर्तिताः॥ अविशुद्धशरीराणां देहि
नां तु जन्मांतरे। जन्मांतरेऽपसर्पंति तस्माच्छोधनमाचरेत्। एवमनया दिशा अन्येषामपि व्याधी
नां कर्मजत्वमभ्यूह्यत इति॥ ८॥ भिषजामुपक्रमेण युक्तिव्यपाश्रयेण न सिद्धिं
यांति कर्मजा रोगाः॥ किं तर्हि दैवव्यपाश्रयेण सिध्यंतीत्याह॥ जा॥ दानेर्दयापिरपिच

द्विजदेवतागोगुर्वर्हणाप्रणतिनिष्ठजपैस्तपोभिः॥ इत्थं कृतपुण्यनिचयैरपचीयमानाः प्राक्पाप
जा यदि रुजः प्रशमं प्रयांति॥ प्राक्पापजा यदि रुजः प्रशमं प्रयांति॥ के॥ इत्थं कृतपुण्यनिचयैः
इति शब्देन दानादयो गृह्यंते॥ दानैर्गोभूसुवर्णरत्नदानादिभिः॥ दयाभिः सर्वभूतानुकंपाभिः॥ द्विजदे
वतागोगुर्वर्हणाप्रणतिनिष्ठा॥ द्विजा ब्राह्मणाः॥ देवता ब्रह्मादयः॥ गोगावः॥ गुरवः उपाध्यायपितृ
ज्येष्ठभ्रात्रादयः प्रभृतयः॥ तेषां अर्हणा पूजा॥ प्रणतिः प्रणामः॥ जपैर्गायत्र्यादीनां॥ तपोभिः कृच्छ्रचांद्रा
यणोपवासादिभिः॥ इत्थं कृतपुण्यनिचयैरिति॥ इति शब्दैः किंप्रकारेणैवोक्ताः कथिताः पुण्यनिच
याः धर्मसंघाताः॥ तैरपचीयमानाः क्षीयमाणाः॥ प्राक्पापजाः पूर्वजन्मकर्मजाः॥ यदि कदाचित्
रुजो व्याधयः प्रशमं उपशमं प्रयांति॥ प्राप्नुवंति॥ ८॥ प्रागुक्तदोषैर्विकारा भवंतीति॥ किंभूतैर्दो नी०टी०
षैरित्यत आह॥ ९॥ स्वहेतुदुष्टैरनिलादिदोषैः रूपप्लुतैः स्वेष्वपरिस्खलद्भिः॥ भवंति ये प्राणभृतां ११

विकारास्ते दोषजास्ते भेषजस्तु विसाध्याः॥ १०॥ दोषजाः विकाराः ये अनिलादिदोषैर्भवंति॥ तैः कीदृशैः॥ स्वहे
तुदुष्टैः॥ स्वकीयाश्च ते हेतवश्च स्वहेतवः॥ तैर्दुष्टाः स्वहेतुदुष्टाः॥ अनिलादयस्तैः॥ स्वहेतवः स्वकारणानि॥ त
स्य मारणानि॥ तत्र वातस्य रूक्षतिक्तकषायादीनि॥ पित्तस्य कट्वम्लविदाह्यादीनि॥ श्लेष्मणो गुरुमधुर
शीतादीनि॥ दुष्टग्रहणेन संचयप्रकोपावुक्तौ॥ अनिलादिदोषैर्वातपित्तकफैः शारीरैः॥ रजस्तमोभ्यां
च मानसाभ्यां दोषाभ्यां॥ तथा चरकः॥ वातः पित्तं कफः प्रोक्तः शारीरो दोषसंग्रहः॥ मानसः पुनरुद्दि
ष्टो रजश्च तम एव च॥ उपप्लुतैर्विमार्गगैः॥ प्रसृतैरित्यर्थः॥ स्वेषु पुष्टिदेषु परिस्खलद्भिः॥ स्थानसंगं कुर्वद्भि
ः॥ इत्यनेन स्थानसंश्रय उक्तः॥ प्राणभृतां प्राणिनां॥ विकारा इत्यनेन व्यक्तिभेदौ दोषाणां दर्शितौ॥ इत्ये
वं संचयप्रकोपप्रसरस्थानसंश्रयव्यक्तिभेदैर्दोषाणां ये भवंति॥ ते दोषजा विकारा इति॥ तथा चोक्तं सु
श्रुतेन॥ संचयं च प्रकोपं च प्रसरं स्थानसंश्रयं॥ व्यक्तिभेदं च यो वेत्ति दोषाणां स भवेद्भिषक्॥ कुपिता

नां हि दोषाणां शरीरे परिभ्रमतां । यत्र संगः खवैगुण्याद्व्याधिस्तत्रोपजायते । तेन दोषजा ते षडजाः शुद्धिसा
ध्याः । ते षडजैरौषधैः संशमनादिभिः । शुद्धाश्चा वमनविरेचनानुवासननिरूहनस्यैर्निर्हरणं दोषाणां
शुद्धिः । तया साध्याः साधनीया इति ॥ ७ ॥ इदं पूर्वमुक्तं अपरे कर्मदोषजा विकाराः । न्यात्त्रतिपाद्यन्ना
ह ॥ ७ ॥ दानादिभिः कर्मभिरौषधीभिः कर्मक्षये दोषपरिक्षये वा निवर्तन्ते ये यत्नवतां कथंचित्ते क
र्मदोषप्रभवा विकाराः । ये ते विकाराः कर्मदोषप्रभवाः । ये यत्नवतां प्रयत्नवतां कथंचित् कष्टक
ल्पनया निवर्तन्ते । कथं । कर्मक्षये । प्राक्तनाशुभदानैः । दानादिभिः कर्मभिरिति । दानं दया ब्राह्मण
देवगुरुगोपूजा तपो जपस्त पः क्रियादिभिः । दोषपरिक्षये च । दोषपरिक्षये वृद्धैर्दोषैः संनच्चामन्यो नी॰टी॰
त्याहानं ॥ कालैः । औषधीभिः । भावरलंगमाभिः । ते इत्थंभूताः कर्मदोषप्रभवा विकाराः । कर्माणि च १२
दोषाश्च कर्मदोषाः त्या प्रभव उद्भवो येषां ते कर्मदोषप्रभवा विकारा इति ॥ ७ ॥ प्रागुक्ते दोषजा ते ष

जाः शुद्धिसाध्याः । ते षडजाः शुद्धिसाध्या एवं विकाराणां परिक्षिते दोषादिभिर्भवतीति । दोषादि परीक्षणार्थ
माह ॥ ७ ॥ दोषप्रदेशबलकालविकारसत्त्वसात्म्यौषधानलवयः प्रकृतीः परीक्ष्य नानाप्रकारपवनादि
गदातुराणामुक्तं चिकित्सितमिदं न तु कर्मजानां ॥ ७ ॥ इदं चिकित्सितं पवनादिनिवर्तितपित्तकफसत्त्वरज
स्तमोभिः । शरीरमनोऽधिष्ठानैरनाश्रयभेदेन अन्योन्यसंसर्गेण वा सन्निपातादिना वा नानाप्रकारैरसंख्ये
यत्वात् । ये ये गदा रोगास्तैः आतुराणामार्तानां उपकाराय कथितं । नानाप्रकारपवनादिगदातुराणां व
क्ष्यमाणत्वाये ना उक्तं इति क्रिया । किं कृत्वा परीक्ष्य । कान् दोषान् । आश्रितो दोषा एवाहौ परीक्ष्यंते । तत्कार
णत्वात् सर्वरोगाणां तथा चोक्तमुत्कृतावार्येण । नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः । अनुक्त
मपि दोषाणां लिंगैर्व्याधिमुपाचरेत् । तत्र बालातिगं धनयोः ॥ इति धातुः । तप धूप संतापे । श्लिष आलिंगने
। एतेषां वृद्धिहेतैः कृत्यैः परैः वातः पित्तं श्लेष्मेति द्रूपाणि भवंति । एषां स्वरूपं चरकाचार्येणोक्तं । रू

क्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः। विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति॥ सस्नेहमुष्णं
तीक्ष्णं च द्रवमम्लं सरं कटु। विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति। गुरुशीतमृदुस्निग्धमधुरस्थिर
पिच्छिलाः। श्लेष्मणः प्रशमं यांति विपरीतगुणैर्गुणाः॥ तत्र वातपित्तश्लेष्माणः शारीरा दोषाः। मानसौ
च रजस्तमसी। तेषां च गतिरनेकप्रकाराश्चरकेणोक्ताः। क्षयः स्थानं च वृद्धिश्च दोषाणां त्रिविध
गतिः। ऊर्ध्वं चाधश्च तिर्यक्च विज्ञेया त्रिविधा परा। त्रिविधा चापरा कोष्ठशाखामर्मास्थिसंधि
षु। इत्युक्ता विधिना देहे दोषाणां त्रिविधा गतिः। दोषाः प्रवृद्धाः स्वं लिंगं दर्शयंति यथाबलं॥ क्षीणा ज
हति लिंगं स्वं समाः स्वं कर्म कुर्वते। ते च किं प्रकृतिस्थाः किं वा प्रकुपिताश्च किं वा स्वतंत्राः परतंत्रा वा। नि०टी०
यथा एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेदिति। किमेकशो द्विशस्त्रिशो वा। किं रसादिधातुस १२
हिता असहिता वा। किं वा तद्विएम्वादिमत्तैः संमिश्रा असंमिश्रा वा। किमेकद्वित्र्यंशबलविकल्पा

दिना प्रकारेण। एवं बहुविधा वीक्ष्यमाणा असंख्येयतां प्रतिपद्यंते॥ इत्युपगम्यते। इति संक्षेपे
णोक्ता दोषपरीक्षा॥ ७॥ दोषपरीक्षानंतरं प्रदेशपरीक्षा रभ्यते॥ ८॥ प्रदेशशब्देन भूम्यातुरावुच्येते। त
था चोक्तं चतुर्भेणेन। भूम्यातुरौ प्रदेश इति। भूमिदेशं विद्यात्। स त्रिविधः। अनूपो जांगलो मिश्रः॥ अ
हितो हितः समश्च। प्रवक्ष्यते लक्षणं तस्य। नदीपल्वलशैलाद्यः पद्मोत्पलकषैर्युतः। हंससारसका
दंबबलाकादिजसेवितः। वराहरवदुमहिषकुरुरोहितसंकुलः। प्रभूतद्रुमपुष्पाद्यो नानासस्यफ
लैश्चितः। अनेकशालिकेदारकदलीक्षुविभूषितः। अनूपदेशो भूयिष्ठवातश्लेष्मामयान्वितः॥ अ
ल्पांबुः पुर्बलाः स्थूलाश्चलन्मेदस्तनोदराः। नराः प्रायेण तस्मात्तैरन्नपानं सुखावधिभिः॥ अनभिष्यं
दि लघ्वन्नं सेव्यं लघु च दीपनं॥ आकाशश्च प्रविकतास्फली विषमतूतलः॥ शमीकरीरबिल्वार्क
पीलुकर्कंधुसंकुलः। मृगरषतगोकर्णखरबत्तुमसन्वितः॥ अथ माधवकरणलक्षणं॥ ॥संसृष्टल

कमाद ७

लक्षणोपेतो देशो साधारणो मतः। समः साधारणो यस्मात् शीतवर्षोष्ममारुताः। समता चैव दोषाणां त
स्मात् साधारणो मतः॥१॥ नातिप्रकाशा तु विपीतोयाल्पमुत्वाडु सनिलो देशो वातलो जांगलो मतः॥ जां
गल उच्यते। तत्राल्पभेदः प्रातुर्याः स्थिरा ज्ञितपरिश्रमाः। सुसंहिततमांगाश्च बलिनोऽल्परुजो नराः॥ आ
युष्मंतो निलप्रायारोगास्तेषामिदं हितं। बृंहणं गुरु यत् स्निग्धमन्नपानं द्रवं नवं॥ अनूपजांगलाभ्यां
च देशो व्यामिश्रलक्षणः। साधारणस्मृतो देशः सर्वव्याधिचिकित्सिते। सुश्रुतेनाप्युक्तं। समता चैव दो
षाणां तस्मात् साधारणो मतः॥ इति संक्षेपेणोक्ता देशपरीक्षा॥ ॥७॥ आतुरो प्रदेश इति। उक्तं च सर्वं
भूमिपरीक्षानंतरं आतुरपरीक्षा आरभ्यते॥८॥ आतुरमुपक्रममाणेन भिषजा आयुरादौ परीक्ष नी॰टी॰
मिति सुश्रुतः। रसविशेषिके चोक्तं। आयुः पुनरादौ परीक्ष्यं। सति तस्मिन् क्रियायाः साफल्यं। तत्रायु १४
ःज्ञीवितं प्राणादि संयोगपूर्वकं। इति वदंत्यात्मायविदः। तथा च चरकः। शरीरेंद्रियसत्वात्मसंयोगा

धारिजीवितं। नित्यगं चानुबंधं च पर्यायैरायुरुच्यते। सत्वमात्मशरीरं च त्रयमेतत्रिदंडवत्। लोकस्तिष्ठ
ति संयोगात् तत्र सर्वं प्रतिष्ठितं। सुश्रुतेनाप्युक्तं। अग्निः सोमो वायुः सत्वं रजस्तमः पंचेंद्रियाणि भूतात्मे
ति प्राणाः। तदुक्तं न निमित्तलक्षणादेवरिष्टाख्याविघातानि स्वशास्त्रे ख्योज्ञातव्यानि। चरकेणाप्युक्तं
रोगी तु कायदेशस्य परीक्ष्या बलायुषी। एवं कथमिति बलानुरूपं स्यादुपचारोऽनुबंध इति। इयमरि
ष्टैरायुरित्यादि। त्रिविधं शरीरमल्पं मध्यं सुमहच्चेति परीक्ष्यादौ। कुर्याद्द्विह्रद्धिरामौ ते ब्रह्मा दारयोर्वै धेमध्या
सुश्रुतेनाप्युक्तं। देहः स्थूलः कृशो मध्य इति। वाग्भटोपदिष्टं। कर्शयेद् बृंहयेच्चापि सदा स्थूलकृशौ नरौ। रक्षणं चैव
मध्यस्य कुर्वीत सततं भिषक्। इति संक्षेपेणोक्ता आतुरपरीक्षा॥७॥ आतुरपरीक्षानंतरं बलपरीक्षा
धिक्रियते। तथा चोक्तं सुश्रुतेन। यस्माद् बलवतः सर्वक्रियाप्रवृत्तिः। तस्माद्बलमेव प्रधानमधिकर
णानां। केचित् कृशाः प्राणवंतः स्थूलाश्चाल्पबला नराः। तस्मात् स्थिरत्वं व्यायामैर्बलं वैद्यः प्रतर्कयेत्।

बलमोजस्तेजइतित्रिविधं। तत्र बलं किमुच्यते। तत्र रसादीनां शुक्रांतानां धातूनां यत्परं तेजस्तदोज
स्तदेव बलमित्युच्यते। स्वशास्त्रसिद्धांतात्। तत्र बलेन स्थिरोपचितमांसता। सर्वचेष्टास्वप्रतिघातः
स्वरवर्णप्रसादो बाह्यानामाभ्यंतराणां च करणानामात्मकार्यप्रतिपत्तिर्भवति। अथ किमिदं तेजः।
तेजोऽप्याग्नेयं क्रमशः पच्यमानानां धातूनामग्निनिरंतरमुदरस्थं तेनेदं जातं वसाख्यास्त्रीणां विशे
षतो भवति। तेन मार्दवसौकुमार्यमृदल्परोमतास्माद्दृष्टिस्थितिपक्तिकांतिदीप्तयो भवंति। अथौ
जः किमुच्यते। ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं। विविक्तं मृदु मृत्स्नं च प्राणायतनमुत्तमं
।देहः सावयवस्तेन व्याप्तो भवति दहिनः। इति सुश्रुतः। चरकेप्युक्तं। हृदि तिष्ठति यच्छुद्धं रक्तमीषत्स ति० दी०
पीतकं। ओजः शरीरे व्याख्यातं तन्नाशान्म्रियते नरः। गुरु शीतं मृदु स्निग्धं बहुलं मधुरं स्थिरं। प्रस १५
न्नं पिच्छिलं शुक्लमोजो दशगुणं स्मृतं॥ एवं चरकाचार्येण। ईषद्रक्तपीतं शुक्लं चाद्विरूपमोजो व्यावर्णि

ल१
तं। तत्र केचिद्बलमेवौजस्तेजसी विशेषेण व्यावर्णयंति। अपरे तु अविशेषमेवैषां व्यावर्णयंति। तत्र
उत्तमे बले उत्तमः पुरुषः। मध्यमे मध्यमः पुरुषः। अल्पे च अल्पः पुरुषः। तत्र यथाबलं दारुणम
ध्यमामृद्वी च क्रिया कार्या। यदि पुनर्दुर्बलस्य दारुणो व्याधिर्भवति। तीक्ष्णेन कर्मणा साध्यः। तस्य ब
लस्य हंदपि यावन्मृद्वेव कर्म पुनः पुनः प्रयोक्तव्यं। आत्मनो दोषहरणात्। तथा चोक्तं॥ मनो बलायं बलवि
घात्कालं प्राणहितं च तत्। तस्मादन्येन रत्नव्यो मलो बलमर्दिमता। महाव्याधिपरीतस्य बहुदोष
स्य देहिनः। बलमाप्याय्य तद्वैद्यः शनैर्दोषमपि क्षिपेत्। एवं यथाबलः प्रयोगः आरोग्यताहेतु विपर्ययो
पि ध्या। चरकाचार्येण त्रिविधं बलमुक्तं। सहजं कालजं युक्तिजं च। तत्र सहजं यद्वपुः प्राकृ
तं। स्वाभाविकं। कालकृतं तं ऋतुविभागजं। वयस्कृतं च। युक्तिकृतं तु यन्नत्यदाहारचेष्टायोगजं। इ
त्येव बलपरीक्षा भेदेन प्रोक्ता। बलपरीक्षानंतरं कालपरीक्षा आरभ्यते॥ अथ कोयं कालो नाम

।कालस्तु अयनवत्सराख्यः। तत्र वैशेषिका द्रव्यं मन्यंते। कालः परापरव्यक्तिकरयौगपद्यचि-
रक्षिप्रप्रत्ययलिंग इति। तथा अन्ये न्यायविदः। शीतोष्णवर्षाधारणलक्षणः कालः। उक्तं च महा-
भूतविशेषाः स्पर्शः शी तोष्णद्वयभेदतः। कालमित्यध्यवस्यंति न्यायमार्गानुसारिणः। वैयाकर-
णास्तु क्रियालक्षणं कालं मन्यंते। आदित्यग्रहनक्षत्रपरिस्पंदनमतः परे। भिन्नमावृत्तिभेदेन का-
लं कालविदो विदुः। इति। तत्र केचिदेवं कालशब्दं व्युत्पादयंति। कलानां समूहः कालः। कालशब्-
स्य समूहे ऽण् इत्यनेन सूत्रेण समूहार्थे अणि रूपं। अन्ये त्वन्यथा। काले संख्यापरिमाणयोरित्य-
स्य धातोर्घञ्प्रत्यये अणप्रत्यये वा रूपं। तस्मात् यत्रिमित्तं संख्यापरिमाणं वा। निमेषकाष्ठा- नि०टी० १५
कलामुहूर्ताहोरात्रपक्षमासर्त्वयनसंवत्सरयुगादिभिः स कालः। वैद्यके तु संवत्सरशरीर-
स्य ऋतुवेगिनः कालस्य ग्रहणं। तस्योपयोगित्वात् चिकित्सायां॥ तथा च सारपाणिः॥ शिशिरश्च वसं-

तश्च ग्रीष्मः प्रावृट् शरद्धिमाः। ऋतवः षट् क्रमादेते कालः संवत्सरात्मकः। द्विधा चायनभेदेन स्मृतः
संवत्सरस्त्वसौ। ने आदानविसर्गाभ्यां रविचारात् द्विधायनं। उत्तरायनमादानं शिशिराद्यं ऋतुत्रयं।
वर्षादि तु विसर्गाख्यं सवितुर्दक्षिणायनं। स्मृता [illegible] दानविसर्गाख्यं तत्संज्ञमयनद्वयं। आग्नेयं वि-
द्धि आदानं विसर्गं सौम्यमत्र तु। आदाने तु जगत्स्नेहमाददानो दिवाकरः। रूक्षवातः शोषयेद्यु-
: शिशिराद्यर्तुषु क्रमात्॥ रूक्षो निवर्तयन्तिक्तकषायकटुकान् रसान्। नृणां क्रमेण वर्द्धयति दौर्बल्य-
मृतुषु त्रिषु। विसर्गे विसृजन्स्नेहं सदा स्निग्धश्च मारुतः। सोमः पुष्णाप्यायतबलः स्निग्धो निर्वर्तयेद्र-
सान् क्रमेणैवाम्ललवणमधुरान् ऋतुषु त्रिषु। बलं च वर्द्धयत्येषां क्रमेणागमादिषु। हेमंते शि-
शिरे चाग्र्यं ग्रीष्मवर्षासु चावरं। शरद्वसंतयोर्मध्यं बलं स्यात्प्राणिनां मतं। तथाम्बरमणिर्हंत्याशैत्यो-
ष्मा यांति वक्रमात्। पित्तादयश्चयं कोपं शांतिं चात्रागमादिषु। पित्तं वर्षासु शरदि प्रकोपं याति

हेमन्ते। शमं यान्त्येष पित्तस्य चयकोपशमाः क्रमात्॥ शिशिरे च वसन्ते च ग्रीष्मे चैव कफस्य वा। ग्रीष्मव
र्षाशरत्स्वेवं मारुतस्य त्रिकक्रमः॥ निवर्त्तते रसोऽम्लः शोषामंदीभवंति च। वर्षास्विह्म्लविपाकाश्च
भवंत्यापो यतस्ततः॥ वर्षास्तु चीयते पित्तमृतुशैत्यान्नकुप्यति॥ मदमाकांशुसंपक्वात्तदेशरदि
कुप्यति॥ शरत्सु कुपितं पित्तं प्रशमं याति हि मने॥ वायुश्चोपचयं याति कारणं चात्र वक्ष्यते॥ निव
र्त्तते हिमधुरो हेमंते रस उत्तमः॥ शोषामंदीभवंत्यापः स्वादुपाका भवंति च॥ पित्तं शाम्यति तत्र शैत्या
द्वायुः श्लेष्मा च चीयते॥ स वायुः शिशिरे कोपं याति चोपचयं कफः॥ हेमंते संचितः श्लेष्मा शिशिरे पि
न कुप्यति॥ आदाने चानुगुणत्वे श्लेष्मा विशेषाच्चोपचीयते॥ वसंते रविसंतापात्प्रशमं याति मारु
तः॥ तत्संतापाद्विलीनश्च तदा श्लेष्मा प्रकुप्यति॥ स वसंते प्रकुपितः श्लेष्मा ग्रीष्मे प्रशाम्यति॥ चीय
ते चानिलस्तस्मिंस्तत्र हेतुं निबोध मे॥ निवर्त्तते रसो ग्रीष्मे कटुको न तथैतरेः॥ आपश्च कटुपच्यंते

नी०टी० १७

रूक्षत्वात्तथा यास्ववेः॥ तस्मात्श्लेष्मा शमं याति मारुतश्चोपचीयते॥ स मेघवातान्निद्रितो वायु
र्वर्षासु कुप्यति॥ शरत्काले ऽर्कसंतापाच्च वायुः प्रशाम्यति॥ चयप्रकोपप्रशमान् गतं त्वेवं त्रयो
मलाः॥ ऋतुसंधौ विधिः सर्वस्य क्रमोऽन्यथान्यशःक्रमात्॥ सेव्यश्चानागतो युक्त्या स्वल्पाल्पोपचयः
क्रमात्॥ असात्म्यजा हि रोगाः स्युः सहसा त्यागशीलनात्॥ ऋत्वोरंत्यादिसप्ताहं संधिरित्यभिधी
यते॥ इति कालपरीक्षा समाप्ता॥ ॥कालपरीक्षानंतरं विकारपरीक्षा प्रस्तूयते॥ ॥ विकारपरी
क्षा सम्यक् विकारपरिज्ञानं॥ विकारो रोगः॥ विकारपरिज्ञानपूर्वकं हि चिकित्सितं भिषक्शास्त्रे
तथा चोक्तं चरकाचार्येण॥ रोगमादौ परीक्षेत ततोऽनंतरमौषधं॥ ततः कर्म भिषक् पश्चात् ज्ञानपूर्
वं समाचरेत् इति॥ तत्र निदानसंप्राप्तिपूर्वरूपरूपोपशयैः पंचभिरुपायैर्भवति॥ निदानं च द्वि
विधं॥ सामान्यं वैशेषिकं च॥ तत्र सामान्यं वातस्य रूक्षतिक्तकषायादि॥ पित्तस्य कटुम्लोष्णादि॥ श्ले

भ्रणः गुरुमधुरातिशीतादिभिर्वृद्धमामाशयकं विशेषिकं त्रतिरोगमुक्तं। उनश्चत्रिनेदभिन्नो तयोः कं
वरकेण। कालबुद्धीन्द्रियार्थानां योगो मिथ्यातिवानचादि द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः
॥ निदानादीनां पञ्चानामपि स्पष्टलक्षणं खरनादेनोक्तं। निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा। सं
प्राप्तिश्चेति मन्तव्यो व्याधेः पञ्चविधो ग्रहः॥ निदानं प्रत्ययो हेतुः कर्त्रायतनकारणं। निमित्तं संभवो
ज्ञानं शास्त्राः पर्यायवाचकाः॥ निदानं सर्वरोगाणां त्रिविधं च समासतः॥ दुष्टाहारो विहारश्च कर्म प्राग्दे
हिकं च यत्॥ भविष्यद्व्याधिलिङ्गानि पूर्वरूपमिति स्मृतं। तद्रूपशब्दैः प्राकृशब्दसंयुक्तैर्बुधैरुच्यते।
अव्यक्तलिङ्गं स्वं स्वं यस्मात् व्याधीनां पूर्वलक्षणं। तदेव व्यक्ततां यातं रूपमित्यभिधीयते॥ रूपं निदर्श नी०टी०
नं चिह्नं व्यञ्जनं लिङ्गमाकृतिः। संस्थानं लक्षणं चैव पर्याये रूपमुच्यते॥ हेतुव्याधिविपर्यस्तवि
पर्यस्तार्थकारिणां। औषधान्नविहाराणामुपयोगं सुखावहं। विद्यादुपशयं व्याधेः स हि सात्म्यमिति १६

तः॥ अतोऽन्यथानुपशयो व्याधासात्म्याख्य उच्यते। संप्राप्तिरागतिर्जातिर्व्याधीनामभिधीय
ते॥ सा संख्याविधिवैशेष्यबलकालैर्विभाव्यते॥ अष्टौ ज्वराः पञ्च गुल्माः प्रमेहा विंशतिर्मताः॥ इत्ये
वमाद्या रोगाणां संख्या चोक्ता पृथक् पृथक्॥ विधिर्नाम द्विधा रोगास्त्रिविधाः सप्तधापि चाष्टधा
परिसंख्याता रोगा नीके यथा मताः॥ विशेषं विद्धि रोगाणां योगान्तरतमात्मकान्। तरोद्धं दवकर्षैरु
तमो बहुरुच्यते। दोषाणां समवेतानामंशांशबलकल्पनैः। इयं बलविशेषं तद्विशेषं कालजं
शृणु। व्याधीनामृतुवेलायां नियमाज्जायमानस्य विशेषो विद्यते यस्तु कालापेक्षः स उच्यते। वसन्ते
श्लेष्मजा रोगाः शरत्काले तु पित्तजाः। वर्षासु वातजाश्चैव प्रायः प्रादुर्भवन्ति हि। निशान्ते दिवसान्ते
च वर्जितो वातजा गदाः। अह्नः क्षिपादौ कफजा मध्ये तु पित्तजाः। जीर्णेऽन्ने वातजा रोगा जीर्यमा
णे तु पित्तजाः। श्लेष्मजानुक्रमात् ज्ञेयोऽन्ने नस्यं ते बलिनो मला इति॥ षड्विधं वरोगपरीक्षणमुक्तं सुश्रु

ताचार्येण। षड्विधो हि रोगाणां विज्ञानोपायः। पंचभिः श्रोत्रादिभिः प्रश्नेन चेति। तद्यथा॥ श्रोत्रेंद्रि
यविज्ञेयाः संति विशेषा रोगेषु ये व्रणास्रावविज्ञानीयादिषु वक्ष्यंते। सफेनं रक्तमीरयन्ननिलः॥
सशब्दो निर्गच्छतीत्येवमादयः। स्पर्शनेंद्रियविज्ञेयाः। शीतोष्णश्लक्ष्णकर्कशमृदुकठिनत्वादयो ज्व
रशोफादिषु। रूपेंद्रियविज्ञेयाः शरीरोपचयापचयायुर्लक्षणबलविकारा दयः। रसनेंद्रियविज्ञे
याः प्रमेहादिषु रसविशेषाः। गंधेंद्रियविज्ञेया रिष्टलिंगादिषु व्रणानामव्रणानां च गंधविशेषाः।
प्रश्नविज्ञेया देशकालजातिसात्म्यातंकसमुत्पत्तिवेदनासमुच्छ्रायबलवत्तमूत्रपुरीषाणां प्र
वृत्तिरप्रवृत्तिर्वा कालप्रकर्षादयो विशेषाः। पुनरुक्तेनैव सुश्रुतेनान्यथाप्युक्तं। व्याधीनां प
रीक्षार्थं॥ व्याधिविशेषास्तु प्रागभिहिताः सर्व एव त्रिविधाः साध्या याप्याः प्रत्याख्येयाश्च तत्रैतान्
त्रयस्त्रिविधान् परीक्षेत। किमयमौपसर्गिकः आद्यंतबलः अन्यलक्षणो वेति। तत्रौपसर्गिको यः प्र

नि०टी०
१९

र्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूल एवोपद्रवसंज्ञः। प्राक्केवलो यः
त्पन्नो व्याधिरपूर्वरूपो निरुपद्रवश्च। अन्यलक्षणो यो भविष्यद्व्याधीनां ख्यापकः स पूर्वरूपसंज्ञ
स्तत्रोपद्रवमन्योन्याविरोधेनोपक्रमेत बलवंतमुपद्रवं वा। प्राक्केवलं यथास्वं। अन्यलक्षणे त्वादि
निव्याधौ प्रयतेत। पुनश्च अन्यथा परीक्षा कार्या चरकेण। आचार्यस्योपदेशेन प्रत्यक्षकरणेन च।
अनुमानेन च व्याधीन् सम्यग्विद्याद्वि [illegible] क्षणः। आगंतुरन्वेति निजं विकारं निजस्तथागंतुम
तिप्रवृद्धः। तत्रानुबंधं प्रकृतिं च सम्यग्ज्ञात्वा ततः कर्म समारभेत। इति संक्षेपेणोक्ता विकारपरी
क्षा॥ ३॥ विकारपरीक्षानंतरं सत्त्वपरीक्षाधिक्रियते॥ ४॥ सत्त्वं तु व्यसनाभ्युदयक्रियादिस्थानेषु
अविक्लवकारणकरं। सत्त्ववान् सहते सर्वं संस्तभ्यात्मानमात्मना [illegible] नसः। स्तभ्यमानोऽन्यैः सहते नैव
तामसः। इति सुश्रुतेः। सत्त्वमपि द्विविधं नीरुक्त्वं सहिष्णुत्वं र [illegible] नीक्षांसृष्टो वा यथोक्ता

मेवाक्रियामारभेत। इतरथा त्वनुबध्नतीनां तीव्राणां साध्येतुव्याधौ। क्रमेण तीव्राणां क्रियामाश्वास्मा
तुरं कुर्वीत। एवं आरोग्यहेतुर्भवति। विपर्यये मिथ्येति। अथ रसवैशेषिकः। प्रवरावरमध्यबलं। प
चैवं त्रिविधं प्रवरकमन्तरात्पकविधाराधीराः। प्रवराबलिनो महोत्साहाः। स्वल्पशरीरा ह्यपि। तद्विवि
धमपि स्वागंतुदेहजां पीडां संप्राप्य न व्यथंते नापस्तुचविवमं यांति। मध्यमसत्वास्तु नराः गुणवं
तस्त्वपरिचार्य विक्षय चात्मानं। संस्तंभिताश्च परैरन्यैः स्थैर्यं चमुपयांति। तुरुणास्तु हीनसत्वाः
शरीरवंतोपि वेदनां प्राप्य स्वल्पामपि व्यथंते। स्वल्पैः पिनयेऽवमीदंति। बीजस्मरो ह्यनैरवकथा
मुपश्रुपरुषशोणितान्यथवा। दृष्ट्वा विषादं मूर्छाभ्रंशपतनमरणानि यांत्याशु। चक्षुष्येण दपि नी०टी०
संस्पेपाणौ आमत्वपरीक्षा॥ तामसत्वपरीक्षानंतरं सात्म्यपरीक्षा आरभ्यते॥ ॥ किमिदं सात्म्यं २०
नाम॥ आत्मशरीरमनः परमात्मादेहादि इतिरपि शरीरे वर्तते। सह आत्मना वर्तत इति सा

त्मतद्भावः सात्म्यं। तथा चोक्तं। सर्वं तामस्मतदात्मनः। कायउपवेशानइति। सात्म्यार्थो ह्युपशयार्थ
गतस्तु चतुर्विधमुक्तं। नरस्यदेहस्तु रोगहेशादेदेनं अनुशेते यद्दं सोउपशाद्देः सात्म्यं तु। ऋतुसात्म्यं
यथा॥ स्निग्धोष्णं हेमंते। शिशिरे वा कटुतिक्तरूक्षाणि। शिशिरांते शास्यंते। ग्रीष्मेतु स्वशीतमधु
राणि। व्याधेः सात्म्यं विषात्त। क्षरस्यपेया विरेचनं छर्दि। स्नेहो न स्यं तु धूमस्तथा। व्याधे सात्म्यं प्रति
रूपायोक्ष्मसेको। मधुरमांसशालिगोधूमगोजनं पाश्चिमोत्तरापथगाः। मरस्य लवणे तु सैंधवमु
राविष्टमौवीरकादीनां। दक्षिणतश्च यवागूः। प्राच्यास्तु उपत्रशाकमत्स्याद्याः। फलमूलकं दशा
कान्याकृः। सात्म्यानि शेलदेशानां। इत्येवं विधं चतुर्विधं सात्म्यमुक्तं। चक्षुष्येण न षड्विधं चरवर
नादः। दोषप्रकृति देशर्तु व्याधिसात्म्यमथौकजं। सात्म्यं षड्विधमुद्दिष्टमसात्म्यं तद्विपर्ययात्
दोषप्रकृतिदेशर्तुव्याधीनां स्वगुणैः पृथक्। विपरीतगुणं सात्म्यं तुल्यश्चासात्म्यमुच्यते॥ सा

सात्म्येनोपशेते यत्तु उपशेते यद्दोचित्त्वादोकसात्म्यं तदुच्यते। अविरुद्धात्मात्म्योजावात्। सातत्य
प्रयोगाद्दोकःसात्म्यं तदुच्यते। असात्म्यं चानुपशयं सात्म्यं चोपशयं विदुः। इत्येवं विधं षड्विधसा
त्म्यमसात्म्यं चोक्तं॥ रवरनारेन॥ सात्म्यं पुनरष्टविधं जातिरोगातुरं धन्वं रसदेशर्तुकसात्म्यं सं
ज्ञा। सात्म्यलक्षणं तु अविरुद्धं। एवं ह्याह। सात्म्यं उचितमिति। तत्र जातिसात्म्यं नाम। यद्दस्य जन्मप्र
भृत्युचितं। येन तत्विमर्द्दितस्तस्तु नः क्षीरं घृतं च। रोगसात्म्यं नाम। यदस्य रोगस्योपयुक्तं सुखं परि
णमति। बलवर्णं च नवति। आतुरसात्म्यं नाम। येन यस्मिन् व्याक्षेशांतिर्भवति। तस्मिन्नतस्मिन्
व्याक्षे आतुरसात्म्यं। तथा हि। यवक्षारतक्रेण मातीसारः शाममेति। अयवायस्य रोगस्य यस्मा सात्म्ये नी०टी०
नप्रशस्तं। तस्मिन् रोगे तदातुरसात्म्यं। यथा। गुल्मिनां क्षीरं। उदावर्तिनां घृतं प्रमेहिणां मधु। तथा चोक्तं
वर्णवान् बलवान् गुल्मी नित्यं क्षीराशनो नवेत्। तस्मात् क्षीरं निषेवेत तत्तस्य परमौषधं। न कथं चि २१

श्र

उदावर्त्ती घृतं भुंजीत भोजनं। पीत्वा प्राश्नोजनात् सर्पिः स्निग्धं भुंजीत भोजनं। मधुश्लेष्मण्युदिष्टं नित्यं व
पथ्यं प्रमेहिणां। धन्वसात्म्यं नाम। शालिषष्टिकव्रीहियवगोधूमप्रभृतीनां धन्यानां यस्य यत्सुखं
परिणमति। आरोग्यं चोत्पादयति। तत्तस्य धन्यसात्म्यं। रससात्म्यं नाम। मधुराम्ललवणकटुतिक्त
कषायाणां षण्णां रसानां यस्य यः सुखं परिणमति। आरोग्यं चोत्पादयति। देशसात्म्यं नाम। आनूपजां
गलसाधारणेषु यत्र यत्र पथ्यं तत्र सात्म्यं। रुचिरुत्पादयति। देशर्तुसात्म्यं नामः। यस्मिन् यस्मि
न्नृतौ यत् यत् पथ्यं तत्तस्मिन् तस्मिन् सात्म्यं। उदकसात्म्यं नाम॥ नादेयपार्वतीयोदपानकर
कांतरिक्षप्रभृतीनां उदकानां यत्तु यत्पथ्यं तत्तत्सात्म्यं। एवं ह्याह। नदीनामुदके दुष्टे उदपानोद
कं पिबेत्। उदपानोदके दुष्टे आंतरिक्षोदकं पिबेत्। यस्य वा यदु सुखं परिणमति आरोग्यं चो
त्पादयति तत्तस्य सात्म्यं। एवमष्टविधं सात्म्यमुक्तं। रसवैशेषि ष्यग्ध्यान्यतः सार्वकालिकम

पिमर्द्दत्वकषायाणां सात्म्यमुक्तं। षष्टिकान् शालिमुद्गांश्च सैंधवामलके यवान्। आंतरिक्षं पयः सर्पि
र्जांगलं मधु चाचरेत्। तच्च नित्यं प्रयुंजीत स्वास्थ्यं येनानुवर्त्तते। अजातानां विकाराणामनुत्पत्तिक
रं च यदिति वचनात्। एवमेतानि बहूनि सात्म्यान्युक्तानि। तदेतेषां युगपत्संनिपतितानां विधि
साकाले किं प्रयोक्तव्यमिति संदेहः। तत्र यथा। यदेतत् ऋतुसात्म्यं। तत्र केषांचित् ऋतुवितं ऋ
तुरौकःसात्म्येन भवति। तद्यथा नर्विघांगाय मुनयोरंत◌राजे। हेमंते लुब्धाणां जनपदानां सकु
लिरेव अविरुद्धौकःसात्म्यं भवति। तथा कस्यचिद्देशं तत्रैव मलस्य हेमंतेऽपि अपथ्यत्वत◌ऋतु
सात्म्यं हेमंते प्रोक्तं। तिक्तकषायकटुका एव रसाः। अविरुद्धौकसात्म्यं भवति। तत्र किं तावदौकः
सात्म्यं क्रियतां आहोस्वित् ऋतुसात्म्यमिति। एवमेव संदेहप्रकारोऽन्येष्वपि सात्म्येषु योजयित नि० टी०
व्य इति। तत्रोच्यते। अविरोधात्सर्वव्यामिश्राणामुपयोगो भवत्येव। यस्मा◌दाचार्यःस्वयमेव समवा २२

एषां तानि परस्परविरुद्धानि सात्म्यानि निर्दिष्टानि। न च परस्परव्याघातादेषां प्रयोगः संभवति। २२
तस्मादिज्ञायते कश्चिद्व्यामिश्राणां सात्म्यानां प्रयोगः। कश्चित्सर्वेभ्यो यस्य बलवत्त्वं तस्य प्रयोगः इति। अन्य
थापरस्परं विरुद्धसात्म्योपदेशोऽनर्थक एव स्यात्। यस्माद्व्यामिश्राणां कश्चित्प्रयोजनमाह। तस्माद्वि
ज्ञायते। व्यामिश्रेणैकान्यपि प्रयोज्यानीति। तथा चोक्तं। तेषां तत्सात्म्यमिज्ञानि भेषज्यान्यवचारये
त्। व्याधिसात्म्यदेशसात्म्यप्रत्ययनैषज्ये विमिश्रस्याहारस्य सात्म्यस्य मध्ये ऽनुप्रयोग उक्त इति। अ
थवा अन्यथा व्याख्यायते। अन्यानऽपि परस्परं विरुद्धानेकसात्म्योपदेशो रितिशारीरसात्म्यप्र
कृतिसात्म्यव्याधिसात्म्यानां किंचिदेकं कस्यांचिदवस्थायां बलवत्तात्प्रधानं यत्तस्यैव प्रयोगो
भवति नेतरस्येति सर्वेषां सात्म्यानां व्याधिसात्म्यं बलवदिति ज्ञेयं। व्याधिसात्म्येन हि सर्वाणि सात्म्या
नि विरुद्धमानानि बाध्यंते। तत्र ऋतुसात्म्यात् देशसात्म्यं बलवत् देशसात्म्यात् शारीरसात्म्यं

बलवान्। ऋतुकः सात्म्यमेव दिवाशरीरसात्म्यमुच्यते। नान्यदिति। शरीरसात्म्यात्त्वृतुसात्म्यं बल
वान्। ऋत्विति सात्म्यादपि व्याधिसात्म्यं बलवत्। अतः सर्वेषां सात्म्यानां व्याधिसात्म्यस्यैवात्र प्राधान्यमि
ति। कथमिदं गम्यत इति चेत्। युक्तिवचनाभ्यां युक्तिस्तावत् सात्म्यविशेषणाद्दुत्सर्गापवादेन बा
ध्येत भवति। इति। तत्र ऋतुसात्म्यं सर्वदेशसामान्यं देशसात्म्यमेकदेशत्वाद्विशेषः। देशसात्म्यम
पि। तत्र देशे सर्वपुरुषसामान्यं। ऋतुकः सात्म्यं तु प्रत्यात्मिकत्वाद्विशेषः। ऋतुकः सात्म्याद् पि व्याधि
सात्म्यं बलवत्। ऋतुकः सात्म्यं हि स्वस्थकाले सावकाशं। व्याधिसात्म्यं तु काराचिकं। तस्य कादाचित्
त्वात् शरीरपीडाहरत्वात् प्राधान्यं चिकित्सानुरूपप्रयोगत्वाच्च। व्याधिसात्म्यं सर्वेभ्यः सात्म्येभ्यो ब
लवदिति। युक्त्या बलवत्त्वं सात्म्ये प्रतिपादितं। वचनेनापि इदानीं प्रतिपाद्यते। ऋतुसात्म्यात् व्याधि
सात्म्यं बलवदिति। तथा चोक्तं। ग्रीष्मवर्ज्जेषु कालेषु दिवास्वप्नात् प्रकुप्यतः। श्लेष्मपित्ते दिवास्व



प्नस्वप्नादेते पुनेष्यते। एवमुक्त्वा ऋतुसात्म्यं पुनराह। गीताध्ययनमद्यस्त्रीकर्मभाराध्वकर्शिताः
। सर्व एव दिवास्वप्नं सेवेरन् सार्वकालिकमिति। अतो वचनाद्विज्ञायते। ऋतुसात्म्याद्व्याधिसा
त्म्यं बलवदिति। येन ऋतुसात्म्यस्य व्याधिसात्म्यस्यैवाबाधमाह। ग्रीष्मे दिवास्वप्नं ऋतुसात्म्यमु
क्त्वा पुनराह। मेदस्विनः स्नेहनित्याः श्लेष्मलाः श्लेष्मरोगिणः। दूषीविषार्त्ताश्च दिवा न शयीरन् क
दाचन। एवं वचनेन ग्रीष्मकालेऽप्येषां प्रतिषिद्धत्। ऋतुसात्म्याद्व्याधिसात्म्यं बलवदित्युक्तं भवति
। न वक्तव्ये दिवास्वप्नस्यानपानप्रतिषेधात्। ग्रीष्मकाले च एवं विधानात्। व्याधिसात्म्यं बलवदि
त्युक्तं। तथा देशसात्म्यादोकःसात्म्याच्चोभयस्मादपि व्याधिसात्म्यं बलवत् इति इङ्गितं॥ य
थोक्तं। येऽप्यतिलवणसात्म्याः पुरुषाः। तेषामपि खलतीन्द्रलुप्तवलिपलितादिबलवान् प्र
कोपो भवति। तेषां तत्सात्म्यतः क्रमेणापगमनं श्रेय इति। अनागतखलतीन्द्रलुप्तव्याध्युत्प

त्रिपरिहारार्थं देवताशरीरसात्म्ययोरनागतव्याधिजयाद्वर्जनमात्रं । तदेवं सिद्धे व्याधिसात्म्यस्य पूर्वसा
त्म्येभ्यो बलवत्त्वात्प्रयोग इति । सात्म्यपरीक्षा संक्षेपेणोक्ता ॥ ७ ॥ सात्म्यपरीक्षानंतरं औषधपरीक्षा
माह । तच्चौषधं संक्षेपेण त्रिविधं । हेतुविपरीतं व्याधिविपरीतं तदर्थकारि च । तत्र हेतुविपरीतं यथा ।
रौक्ष्यात्प्रवृत्तेऽतीसारे क्रिया स्निग्धा विधीयते । रूक्षाम्लेदनिमित्ते तु शोकजे शोकनाशिनी । व्या
धिविपरीतं तु । दोषप्रत्यनीकं व्याधिप्रत्यनीकं च । तत्र दोषप्रत्यनीकं यथा । वातजे गदे मधुराम्ललव
णस्निग्धोष्णं कर्तव्यं । व्याधिप्रत्यनीकं यथा । कुष्ठे खदिरः प्रमेहे हरिद्रा । ज्वरे पर्पटकं । बस्तिरोगे शि
लाजतु । तदर्थकारि हेत्वर्थं व्याध्यर्थं च यत्करोति तत्तदर्थकारि द्विधा हेत्वर्थकारि व्याध्यर्थकारि टी०टी०
। तत्र हेत्वर्थकारि यथा । मदात्यये मद्यपानं । व्याध्यर्थकारि यथा । वमीषु वमनं । अतीसारे विरेचन २४
मिति । औषधशब्देन द्रव्याण्युच्यंते । तानि च अनेकभेदभिन्नानि । तथा च चरकनादः । पांचभौतिका

योनिर्भूतानां सा चतुर्विधा । तासु योनिषु भूतानि द्विविधानि समासतः । स्वानि जाग्निलौजं वीर्यभूत
वर्गश्चतुर्विधः । जरायुजाण्डजस्वेदजान्योद्भिदानि च । तानि हि द्विविधान्याहुः स्थावराणि चरा
णि वा । अनंतं च द्विविधं द्रव्यं मतं स्थावरजंगमं ॥ आग्नेयं चैव सौम्यं च पुनर्द्विविधमुच्यते । शोधनं शमनं
चैवं तत्तु नद्विविधं मतं । आग्नेयं शोधनं प्रोक्तं सौम्यं प्रक्लेदयेद्वनंतानंतयोस्तु शोधनं द्रव्यं विरेकवमना
दिषु ज्ञेयं यस्मान्न विहत्यर्थं दोषाणां यन्त्र युज्यते । विना संशोधनेऽद्रव्यं तत्संशमनमुच्यते । गुरुमंदद्रव
रस्थूलस्निग्धं सांद्रगंधगुणाधिकं । नौमं द्रव्यं हि तत्स्नेहगौरवोपचयावहं । गुरुशीतं स्वादुरसं स्निग्धं मंदं स्थिर
साधिकं । आप्यं तत्स्नेहविष्यंदमार्दवक्लेदकारकं । रूक्षोष्णतीक्ष्णविशदं लघुरूक्षगुणाधिकं । द्रव्यं
तत्तैजसं विद्याद्दाहपाकप्रभाकरं । शैत्यपारुष्यवैशद्यं शैत्यं स्पर्शाधिकं लघु । वायव्यं तद्धि वैशद्यरौ
क्ष्यग्लानिलाघवशोषकृत् । द्रव्यं लघु सूक्ष्मश्लक्ष्णं शब्दगुणाधिकं । खात्मकं तद्धि शौषिर्यं लघुत्वमार्दवाव

दं। पंचात्मकत्वात्तद्रव्याणां द्रव्यं नानौषधं भवेत्। एवं भूतोद्रेकात्सर्वमेव द्रव्यं पंचभूतात्मकं व्याख्यातं।
तत्र रसगुणवीर्यविपाकप्रभाववशादेण विचार्यमाणं पुनरप्यनेकप्रकारं भवेति। तत्र मधुराम्ललवण
कटुतिक्तकषायाः षड्रसाः। तेषां कटुतिक्तकषाया वातं प्रकोपयंति। कट्वम्ललवणाः पित्तं। मधुराम्लल
वणाः श्लेष्माणं इति। तथा मधुराम्ललवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्म
घ्ना इति॥ तथा च चरकः॥ कफं स्वाद्वम्ललवणाः कषायकटुतिक्तकाः। जनयंत्यनिलं पित्तं कट्वम्ललव
णा रसाः। स्वाद्वम्ललवणा वायुं कषायस्वादुतिक्तकाः। जयंति पित्तं श्लेष्माणं कषायकटुतिक्तकाः॥ इति
तथा वा। कट्वम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफं। कटुतिक्तकषायाश्च कोपयंति समीरणं। ते च पर
स्परं संसर्गात्त्रिषष्टिधा भवंति। सा च त्रिषष्टी रसभेदानां द्विषष्टिर्दोषभेदानां स्वांशांशबलविकल्पवा नि०टी०
ग्मिणो प्रयोगतां याति। तथा चोक्तं चरकाचार्येण। क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित्। दोषौष २५

धादीन् समं चिंत्य भिषजा सिद्धिमिच्छता। द्रव्याणि द्विरसादीनि संयुक्तांश्च रसान् बुधाः। रसानेकैक
शश्चापि कल्पयंति गदान् प्रति। यस्मात् द्रव्यादिकल्पज्ञः सर्वदोषविकल्पवित्। नसमुह्येद्विका
राणां हेतुलिंगोपशांतिषु। एवं रसा व्याख्याताः। इत्यतो गुणा विचार्यंते। शीतोष्णस्निग्धरूक्षाश्च
मंदस्तीक्ष्णो गुरुर्लघुः। पिच्छिलो विशदः श्लक्ष्णः परुषः कठिनो मृदुः। द्रवः सांद्रः स्थिरः सराः। स्थूल
सूक्ष्मश्च विंशतिः। परस्परप्रत्यनीका द्वंद्वशो व्यवस्थिता गुणाः। द्रव्येष्वेते गुणाः संति त्रिषु चाप्यनि
लादिषु। तुल्यैर्गुणैर्दोषवृद्धिर्विपरीतैः परिक्षयः। एवं गुणाः स्वरूपतो वे नोक्ताः। इदानीं वीर्यमुच्य
ते। वीर्यशब्दस्तु शक्त्यध्यवसायोत्साहादिगुणः शुक्रेषु प्रवर्त्तते। तत्र शक्तौ तावद्रसायनं। ब्रह्मस्य तु
दारवीर्यमिति। उदारशक्तिरित्यर्थः। अध्यवसाये वीर्यं बलवर्द्धनानां। अध्यवसायो बलवर्द्धनानामि
ति। अस्मादिषु गुणेषु वीर्यसंज्ञा चांतरसानानि शीतानि कर्माणि विद्यादामलके षपि। यान्यकानि

हरीतक्यां वीर्यस्य तु विपर्ययः॥ उष्णगुणा हि हरीतकी॥ धात्रीफले तु शैत्यं॥ एवं विपर्ययः॥ यथा शीतोष्ण
त्वात् विरुद्धवीर्यं विरुद्धगुणमिति॥ शुक्रे वीर्यसंपत्त्या विवर्द्धमानानां शुक्रविवर्द्धनानित्यर्थः॥ तदेवम
नेकभेदानिश्चयपि। वीर्यशब्दः द्रव्यगुणनिश्चायी॥ तथा च चरकः॥ मृदुतीक्ष्णं गुरुलघुस्निग्धरूक्षोष्णशी
तलं। वीर्यमष्टविधं केचित्केचित् द्विविधमाश्रिताः॥ शीतोष्णमिति वीर्यं तु क्रियते येन या क्रिया इति
नावीर्यं कुरुते किंचित् सर्वा वीर्यवती क्रिया। एवं वीर्यमुक्तं। विपाको विचार्यते। तत्र विपाको नाम पा
चार्यश्चाराराधादेव जाठराग्निसंयोगाद्दोष्मापेक्षं यदुदेति निष्टाकाले गुणांतरं तंडुले क्षिव विक्लि
त्तिः स विपाकः॥ तथा चोक्तं रसपुक्तं। जठरानलसंपर्कात्परिणामांतरं बुध। यत्तु प्रादुर्भवेद्धत्नानां स
विपाकस्मृतस्त्रैः। पक्वे चाम्रादिफले प्रवृत्ते यथा रसमध्ये रोगो भवति। प्रादुर्भवेद्भोऽन्यः परिणामा
रव्यस्तं दोषाद् रसश्च त्रिविधश्चरकाचार्येणोक्तः॥ कटुतिक्तकषायाणां विपाकः प्रायशः कटुः॥ स्व

गी०टी०
२६

लो॥ अम्लं पच्यते स्वादु मधुरो लवणस्तथा॥ मधुरो लवणस्तौ तु स्निग्धभावात्तयो रसौ॥ वातमूत्रपुरीषा
णां प्रायो मोक्षे सुखं मतौ॥ कटुतिक्तकषायास्तु रूक्षभावात्तयो रसाः॥ दुःखाद्विमोक्षे दृश्यंते वातविण्मूत्र
रेतसां॥ शुक्रघ्नो बद्धविण्मूत्रो विपाको वातलः कटुः॥ मधुरः सृष्टविण्मूत्रो विपाकः कफशुक्रलः॥
पित्तलः सृष्टविण्मूत्रः पाकोऽम्लः शुक्रनाशनः॥ तेषां गुरुः स्यान्मधुरः कटुकाम्लावतोऽन्यथा॥
सुश्रुताचार्येणापि द्विविधः पाकः प्रोक्तः॥ मधुरः कटुश्च॥ द्रव्येषु पच्यमानेषु येष्वंबु पृथिवीगु
णाः॥ निवर्त्तंतेऽधिकास्तत्र पाको मधुर उच्यते। तेजोनिलाकाशगुणाः पच्यमानेषु येषु च। निवर्त्तं
तेऽधिकास्तत्र पाकः कटुक उच्यते। तयोर्मधुराख्यो गुरुः॥ कटुकाख्यो लघुरिति। गुरुः पाको वा
तपित्तघ्नः॥ लघुः श्लेष्मघ्नः॥ गुरुः पाकः सृष्टविण्मूत्रतया कफोत्क्लेशेन च॥ लघुर्बद्धविण्मूत्रत
या मारुतकोपेन च॥ चरकादीनामपि पाकद्वयमभिप्रेतं। मधुरकटुकाख्यं। यत एवोक्तं तं॥

तेषां गुरुः स्यान्मधुरः कटुकाम्लौ ततोऽन्यथा ॥ इति ॥ लघुरित्यर्थः ॥ यद्येवं कथमुच्यते ॥ मधु
रश्चाम्लपाकश्च ब्रीहिः पित्तकरो गुरुः ॥ उष्णः कषायः पाकेऽम्लः कफशुक्रानिलापहः ॥ कु
लत्थ इति ॥ उच्यते ॥ अम्लकारित्वसामर्थ्यात्तत्राम्लपाक उक्तो वीर्येणोष्णेन कुलत्थस्यापि पित्त
करत्वं सिद्धं नार्थोऽम्लपाकत्वेन ब्रीहिस्तु प्रभावाद्वीर्योष्णः पित्तलस्तत्र विघ्नति नार्थोऽम्लपा
कत्वयेति ॥ एवं विपाकः उक्त इति ॥ एषां च रसगुणवीर्यविपाकानामुपलब्धिश्चरकाचार्ये
णोक्ता ॥ रसो निपाते द्रव्याणां विपाकः कर्मनिष्ठया ॥ वीर्यं यावदधीवासान्निपाताच्चोपलभ्यते
इति ॥ अथ प्रभाव उच्यते ॥ अथ कोऽयं प्रभावो नाम ॥ माधवनंदनादः (?) ॥ प्रकृष्टो भावः प्रभावः ॥ नि०टी०
द्रव्यस्य विशिष्टस्य शक्त्याधिष्ठितत्वेन विशिष्टजन्मना या सा द्रव्यविशिष्टा निजशक्तिः ॥ सा २३
प्रभावशब्देनोच्यते ॥ तथा चोक्तं सुश्रुताचार्येणापि ॥ न तद्द्रव्यमात्मना किंचित्किंचिद्वीर्येण

सेवितं ॥ किंचिद्रसविपाकाभ्यां दोषं हंति करोति वा ॥ न तद्द्रव्यमात्मना किंचिदिति यदुक्तं ॥ त (?)
तदात्मशक्त्या किंचिन्न ॥ किंचिद्रसादिक
रणशक्त्या दोषं हंति ॥ करोति चेति संदेहापायः ॥ तथान्यैरप्युक्तं ॥ सामान्यविशेषात्मकमिदं कृते (?)
द्रव्यमेव कर्माणि ॥ तत्रापि करणशक्त्या निजशक्त्या वा नेगतिरन्या ॥ या चैषा निजशक्तिर्द्रव्यर
स्यादिकारणनिरपेक्षा सैव प्रभावशब्देनोदिता ॥ चरकमुनिनापि ॥ तथा च चरकः ॥ रसवी
र्यविपाकानां सामान्यं यत्र लक्ष्यते ॥ विशेषः कर्मणां चैव प्रभावस्तस्य सम्मृतः ॥ त्रिकटुः कटुकः
पाके वीर्योष्णश्चित्रको लघुः ॥ तद्वद्दंती प्रभावाद्धि विरेचयति मानवं ॥ विषं विषघ्नमुक्तं यत्प्रभाव
स्तत्र कारणं ॥ ऊर्ध्वानुलोमिकं यच्च तत्प्रभावेन साधितं ॥ मणीनां धारणीयानां कर्म यद्विविधात्म
कं ॥ तत्प्रभावजं तेषां प्रभावोऽचिन्त्य उच्यते ॥ एवं प्रभावस्य स्वरूपं उक्तं पुनरपि त्रिविधं द्रव्य

नि.स.टी.
२८

स्पदोषप्रशमनमन्यत्तु स्वस्थरक्षणस्वस्थवृत्तोपयोगिद्वारेण चरकाचार्येणोक्तं। किंचिद्दोषप्रश
मनं किंचिद्धातुप्रदूषणं। स्वस्थवृत्तौ मतं किंचित्तद्द्रव्यं त्रिविधमुच्यते। पुनरप्यनेन प्रकारेण॥
त्रैविध्यमुक्तं अथ धन्यचरकेण। त्रिविधमौषधमिति। दैवव्यपाश्रयं। युक्तिव्यपाश्रयं। सत्त्वा
वजयश्चेति। तत्र दैवव्यपाश्रयो मंत्रौषधिमणिमंगलबल्युपहारहोमनियमप्रायश्चित्तो
पवासस्वस्त्ययनप्रणिपाततीर्थगमनादि। युक्तिव्यपाश्रयं। पुनराहारविहारौषधानां द्रव्या
णां योजना। सत्त्वावजयस्तु। अहितेभ्योऽर्थेभ्यो मनोनिग्रहः॥ शरीरदोषप्रकोपे तु खलु शरीरमे
वाश्रित्य पुनरपि त्रिविधं औषधं इच्छंति। अंतःपरिमार्जनं। बहिःपरिमार्जनं। शस्त्रप्रणिधान नि०टी०
मिति। तत्रांतःपरिमार्जनं। यदंतःशरीरमनुप्रविश्य औषधमाहारजातं व्याधिं परिमार्ष्टि। २८
नदंतःपरिमार्जनं। यत्पुनर्बहिःस्पर्शनमाश्रित्याभ्यंगस्वेदप्रदेहपरिषेकोन्मर्दनाद्यैरामयान्

परिमार्ष्टि तद्बहिःपरिमार्जनं॥ शस्त्रप्रणिधानं पुनः छेदनभेदनव्यधनदारणलेखनोत्पाटन
सीवनप्रच्छानजलौकसश्चेति॥ एवं औषधपरीक्षासंक्षेपेणोक्ता॥ छ॥ औषधपरीक्षानंतरमनलप
रीक्षामाह॥ छ॥ अनलो निलस्य चेतनानिष्ठानं॥ तथा चोक्तं तंत्रांतरे॥ नाभिर्मध्यं शरीरस्य वित्तेयं सो
ममंडलं। सोममंडलमध्यस्थं विद्यात्सूर्यस्य मंडलं॥ शरीपवनचक्राणां स्थितो मध्ये हुताशनः॥ सूर्या
दिवयथा तिष्ठन् तेजोयुक्तैर्गभस्तिभिः॥ विशोषयति सर्वाणि पत्वलानि सरांसि च॥ तद्वच्छ
रीरिणां भुक्तं जाठरेनानिमास्थितः॥ मयूषैः क्षिप्रमादत्ते नानाव्यंजनसंस्कृतं॥ स्थूलकायेषु सत्वेषु ति
लमात्रप्रमाणतः॥ ह्रस्वकायेषु सत्वेषु त्रुटिमात्रप्रमाणतः॥ क्रिमिकीटपतंगेषु वालमात्रोवतिष्ठते॥ इत्या
दितदायतनं च शरीरप्रमाणं छायौजोबलवर्णादिः॥ स च त्रयोदशविधः प्रधानो जा॥ठरोऽन्नस्य यत्राशित
पीतलीढखादितं षड्रसमाहारं पचति॥ तस्य पच्यमानस्य त्रयो मलाः संभवंति विट्मूत्रक्लेदाः॥

तैर्विरहितोऽपि नः सारभूतो रसो भवति। तस्य रसस्य मलानां च विवेचयिता वायुः जाठरस्याग्ने
धन्वं॰ व्यापकः। तेषु चाग्निषु पंचभूताग्नयः तेषु पंचभौतिकस्याहारस्य स्वान् पार्थिवादीन् विशेषगुणान्
पचंति॥ तथा परे सप्तधात्वग्नयः॥ ते च रसादीनां धातूनां पक्तारः॥ आहाररसेन निषिच्यमानस्य स्वेनापच्य
मानस्य रसस्य श्लेष्मा मलं भवति॥ ततो रक्तस्य स्वेनाग्निना पच्यमानस्य अक्षिविट्त्वक्स्नेहः पित्तं ततो मांस
स्य स्वेनाग्निना पच्यमानस्य छिद्रेषु मलं ततो मेदसः स्वेनाग्निना पच्यमानस्य स्वेदो मलः॥ ततोऽस्थ्नः॥ स्वेना
ग्निना पच्यमानस्य नखरोमादि मलः ततो मज्ज्ञः स्वेनाग्निना पच्यमानस्य अक्षिविट्त्वक्स्नेहो मलं ततः
शुक्रस्य स्वेनाग्निना निरिंद्रं शरीरं पाल्यते॥ सारमलविवेचनात्॥ तथा च चरके॥ आयुर्वर्णो बलं स्वा ती॰ टी॰
स्थ्यमुत्साहोपचयौ प्रभाः॥ ओजस्तेजोऽग्नयः प्राणाश्चोक्ता देहाग्निहेतुकाः॥ शांतेऽग्नौ म्रियते युक्ते चि २९
रं जीवत्यनामयः॥ रोगी स्याद्विकृते मूलमग्निस्तस्मान्निरुच्यते॥ यदन्नं देहधात्वोजोबलवर्णादिपोषकं
माग्निना पच्यमानस्य मलाभावात् सेन निर्मलत्वात्॥ एवं त्रयोदशाग्नि निरूपिते ३

तत्राग्निर्हेतुराहारान्नह्यपक्वाद्रसादयः॥ अन्नमिष्टं ह्युपहितमिष्टैर्गंधादिभिः पृथक्॥ देहे प्री
कृपंचमूलं दशमूलं तत्सैरेयकादिभिः प्रथमोक्तैः ४ [illegible] प्रनिषिद्धाः॥ कोलमारण्यबदरं॥ कुल
त्थाः प्रसिद्धाः॥ एतेषां चतुर्भागः वशेषितैः क्वाथैः ४ सैरेयचंदनदलेत्यादिभिः तैलस्य च
तुर्थांशप्रमाणैः॥ कल्कैः कल्कीकृतैः सदुग्धैस्तैलानि पचेत् सहचरगडूचीप्रसारणीतैलानि
चतुर्गुणदुग्धानि च अनिलहराणि वातघ्नानि पचेदिति॥ पूर्वमुक्तं स्नेहो हितः सुरत्नि
वासकष [illegible] फलादिसां व्रतं पित्तस्नेहं नवासकाद्यं घृतमाह॥ ७५॥ ॥ वासापटोलपिचु
मंदकिराततिक्तात्रायंतिकामृतलताकुटजप्रसूतैः॥ त्रिकायवासकफलत्रयपर्पटैश्च
पक्वं घृतं जयति पित्तरुजः समस्ताः॥ ७६॥ वासादिभिः पक्वं घृतं समस्ताः सकलापित्तरु
जो जयति॥ वासा आटरूषकः॥ पटोलं पटोलपत्रं॥ पिचुमंदो निंबः॥ किराततिक्तको भू
निंबः॥ त्रायंतिका त्रायमाणा॥ अमृतलता गडूची कुटजप्रसूता इंद्रयवाः॥ तिक्ता कटु

कायषा सकोडराजमा। फलत्रयं फला। पर्पटः॥ प्रसिद्धः। एभिः कल्कीकृतैर्घृतं चतुर्थांश
मितैश्चतुर्गुणजलं घृतं गव्यं प्रस्थ॥ पक्कं सत् समस्तान् पित्तरुजो जयति। घृतं पित्तहरं भ
वतीत्यर्थः॥ अत्र क्वेद्रवकार्येतु सर्वत्र सलिलं स्मृतं॥ इति चालयः। पूर्वमुक्तं स्नेहोहि तस्सुरभि
भिवासकषक्षलादि॥ तत्र षट्पलं कफस्ते हनमाह॥ छा॥ ७६॥ शुंठी कणा ग्रंथिक चव्या
[illegible] चित्रकैः ससैंधवैर्वासयवाग्रजैरयवैर्वा। सक्तुन्ध मेभिः पलभागिकैः स्मृतं घृतं कफ
व्याधिहरं द्विषट्पलं॥ ७७॥ घृतं स्मृतं पक्वं षट्पलं नाम कफव्याधिहरं॥ कफेन व्याधयो रोगाः
यान्हरतीति कफव्याधिहरं। पलभागिकैः पलप्रमाणैः एभिर्द्रव्यैः। शुंठी विश्वभेषजं। कणा पि नी॰टी॰ ५९
प्पली। ग्रंथिकं पिप्पलीमूलं। चव्यं हस्तिपिप्पलिलता। चित्रकं शिखी। एभिः ससैंधवैर्वासयवाग्रजैष्पु
र्येतिकरा चित्तसैंधवेन सह कदाचित् यवाग्रजेन यवक्षारेण सह॥ ॥

६ ...नांतरं पुरद्दर्शनात्। मस्तुग्रंथं चतुर्गुणं दुग्धं घृतप्रस्थमितमितमिति॥ छा॥ सांप्रतं षट्पलघृ
तमाह॥ छा॥ शुंठ्यादिभिः मलवणत्रययावशूकैः सस्वर्जिकाख्यचिरबिल्वजवल्ककल्कैः॥ षड्भिः
पलैरिति मृतं घृतमग्निहेतुस्यादार्द्रकद्रवयुतं पृथुषट्पलाख्यं॥ ७८॥ इत्यनेन प्रकारेण मृतं घृतं
पक्वघृतप्रस्थमग्निहेतुस्यात् तन्वेत। आर्द्रकद्रवः स्वरसः। तेन चतुर्गुणेन युतं। पृथुषट्पलाख्यम
पृथुषट्पलसंज्ञं भवति। कैः मृतं। शुंठ्यादीनां षड्भिः पलैः शुंठ्यादिभिरिति पंचकोलकं। लवणत्रयं सैंध
वबिडसौवर्चलानि। यावशूकौ यवक्षारः। स्वर्जिकाख्यः स्वर्जिकाक्षारः। चिरबिल्वजवल्कं वल्कलं
तेषां कल्कैः षट्पलप्रमाणैः मृतमिति॥ ॥इदानीं स्निग्धस्वेदनं अधिक्रियते शक्तिः स्वेदनानंतरं स्वेद
माह॥ छा॥ पुनर्नवैरंडयवान्तमीभिः कर्पासजैरस्थिभिरारनालैः॥ स्विन्नैः समीभिः स्विति षड्भिरेव स्वेदः सम
मीरार्त्तिहरो नराणां॥ ७९॥ शमीभिरनंतरोक्तद्रव्यैः आरनालैः कांजिकैः स्विन्नैः स्विन्नैः॥ अयं स्वेदः

समीरणो वायुः तेन आर्त्तिः पीडा तां हरतीति समीरणार्त्तिहरो भवति। केषां। नराणां। कैः। पुनर्नवादिभिः।
पुनर्नवा वर्षाभूः। एरंड उरुबकः। यवः। श्लक धान्यं। अतसी उमा। कर्पासमज्जैरस्थिजिबीजैः कांजिकमर्दि-
तैः। षड्भिरेव स्वेदः कार्य इति॥ ॥ यो यत्र स्निग्धस्विन्नस्य वमनं क्रियते इति वमनमाह॥ वा॥ सकलिंग
वचामगधामधुकं लवणेन युतं मदनांबु पिबेत्। वमनं कफरोगहरं हि नृणामथवा पिचुमंदकषाय
युतं॥ ८०॥ मदनांबु मदनकाथं। कीदृग्गुणविशिष्टं। सकलिंगवचामगधामधुकं॥ कलिंग इंद्रयवः।
वचा हैमवती। मगधा पिप्पली। मधुकं यष्टीमधु। सह कलिंगादिभिर्वर्त्तत इति सकलिंगवचामगधा
मधुकं। लवणेन सैंधवेन युतं मदनांबु पिबेत्। वमनं कफरोगहरं भवति। नृणां प्राणिनां। कलिंगा- नी॰टी॰
दीनि चूर्णीकृत्य कल्कीकृत्य वा योजनीयानि मदनकाथे। अथवेति पक्षांतरे। पिचुमंदकषाये यु- ६०
तं कलिंगादिभिर्युक्तं वमनं भवतीति। पिचुमंदो निंबः तत्र वमनमेकाहे विश्राम्य स्निग्धान्नं ग्राम्योदकैर्मां-

सैर्मेकस्मिन्नपरस्मिन् प्रभाते वमनं कुर्यात्। तथा च नेडः। एकाहोपरतः स्नेहः स्निग्धाय कंठं नं पिबेत्
तु स्वा ग्राम्योदकैर्मांसैर्गतः पेयमनुसंस्कृतैरिति। काथस्य प्रमाणे उत्तममध्यमाधममात्रा यथासंख्यं
नवषट्त्रयः प्रस्थाः पातव्याः। कल्कचूर्णयोश्च मात्रा यथासंख्यं त्रिद्वि एकपला उत्तममध्यमाधमेषु
पातव्या। तथा च नेडः। नवप्रस्था तु ज्येष्ठा स्यात् मध्यमा षट्प्रकीर्त्तिता। निःकाथस्य त्रयः प्रस्था मात्रा स्या-
त्कनीयसी। त्रिपलं ज्येष्ठमाख्यातं कनीयस्तु पलं पिबेत्। मध्यमे द्विपले विद्यादिति मे निश्चिता मतिः॥
तस्य वमनस्य उत्तममध्यमाधमस्य लक्षणमाह। वमने चास्य वेगाः स्युरष्टौ पित्तांत उत्तमः। षण्णुम-
ध्यमो वेगाश्चत्वारस्त्वधमे मताः इति चतुर्षु वेगेषु वा मितं तं लंघयेत् सम्यक् शुद्धिलिंगानि लक्षयेत्। तानि
दृष्ट्वा तु पेयादिकमं कुर्यात् लंघयेत्। तथा च पेया विलेपी मत्स्यं तं जंतं च यूषं रसं द्वित्रिमथैकशश्च।
क्रमेण सेवेत नरोऽन्नकालान् प्रधानमध्यावरशुद्धिशुद्धः इति पेयादिक्रमः॥ कायचिकित्सानां

मतः इति। शाल्यन्नं वकर्दूणां भुक्त्वा तादृशीं नायूषादिकमोऽनिषेवेत॥ तथा च सुश्रुतः॥ ततोऽपराह्णे सुवि
शुद्धदेहं सुख्याम्बुभिः परिषिक्तगात्रं। कुलत्थमुद्गाढकिजांगलानां यूषेश्च वाल्पमुपभोजयेत। इति॥ बा
एवं च तसंसर्जनमप्युत्तरवपिस्निग्धस्विन्नस्यैव स्यात् ऊर्ध्ववमनात् विरेचनं बहुदोषमत्रिना गेगन्ते देयमि
त्यत आह॥ बा॥ उरुबूकतैलमथ बिडंगघृतं त्रिफलाकषायमथ गुग्गुलुना सुविरेचनं विरचितं हि
णामिति वातपित्तकफरोगवतां॥ व्रणातुराणां भ्रान्तीनां सुविरेचनं शोधनं विरेचनं विरचितमिति॥ उ
रुबूकतैलं एरंडतैलं। वातरोगे विरेचनं। बिडंगघृतं पित्तरोगे विरेचनं। त्रिफलाकषायं गुग्गुलुना
मदः श्लेष्मरोगे विरेचनं। तच्च विरेचनं क्रूरमध्यममृदुकोष्ठे ज्ञात्वा ज्येष्ठमध्यमकनीयसी मात्रा दे नि०टी०
या। तथा च मिश्रमारः॥ पित्तेन स्यान्मृदुःकोष्ठः क्रूरो वातकफात्मकः॥ मध्यमः समदोषत्वान्मा ६१
त्रा योज्या तु दूषतः॥ मात्रमात्रा भेदेनोक्ता॥ द्विपलं ज्येष्ठमाख्यातं मध्यमं तु पलं भवेत्। पलार्द्धमथ

त च कनीयस्तु विरेचनमिति। स्नेहाद्र्ध्वं त्रिरात्रं मांसरसं भुक्त्वा पेयं। तथा च वचदुष्पेण॥ एकाहोत्य
रतः स्नेहं भुक्त्वा प्रष्ठद्दिनं पिबेत्। भुक्त्वा त्रिरात्रं परतः पिबेत् संशोधनं नरः॥ तच्च विरेचनं पित्तप्रधाने
रोगे पित्तं चोक्तं हृदयेनापि च जलेन चतुष्पेणेनोक्तं। प्रमाणेनाढकं त्रिंशत् वेगाः श्लेष्मांतउत्तम
ःदशवेगोऽवरः प्रस्थो मध्यमः ढकविंशकैः॥ वमने च विरेके च तथा शोणितमोक्षणे। सार्द्धत्रयो
दशपलं प्रस्थमाहुर्मनीषिणः॥ तस्मिंश्च विरेके जाते यदि सम्यक् विरेको न भवति। मंदाग्निचा
दातुरस्तदानलोजनीयः। अथ सम्यक् विरेको भवति। विरेचने जीर्णे बुभुक्षितेश्च तदा तस्मिन्ने
वाह्नि पेया दातव्या। तथा च सुश्रुतः॥ मंदा न्दीणम मम्लह्नि रिक्तं न पाययेत्ताह्नि तत्र पेयां।
हीणें दृढाग्निं सुविरेचितं च तत्र मुरवोष्णां ल ..यपेत्। मायाक्लेजीणेनिषज्येन विरेच्ये तयोन र।
मृदत्यमात्रपीतश्च पाययेद्दोषधैर्मृदुः। भुक्त्वा नेकेदिने तस्मिन्नुक्ता न्येघ्ञः पुनः पिबेन्नात्र दृढ.

स्निग्धकोष्ठस्तु पिबेन्नर्द्धं दशाहतः। वमने तिप्रवृत्ते तु हृद्यं कार्यं विरेचनं। विरेके चातिवृत्ते तु वमनं यो
जयेद्भिषक्॥ इदानीं कृतविरेकस्योर्द्ध्वमित्रगवात्। अप्यर्चितद्विजस्य सिक्तस्विन्नस्य मध्याह्ने कृतम
नुरीयस्यानुरक्तस्य कृतमंगलस्य निवासनस्य सतो निरूहणाधिकारः॥ इत्यादि॥ गुडतिं
तिडीककुडवमस्तु नवेदपि चाम्रमूत्रकुडवद्वितयं। मिश्रिराठरामठकसिंधुयुतं तु निरूहणं हि
विहितं मुनिभिः॥ ...स्तु निभिः सर्वरुग्विनिवृत्ति निरूहणं। हृणं प्राणिनां निरूहणमास्थापनं वि
हितं। युक्तं गुडतिंतिडीककुडवमस्तु नवेत्। गुडः प्रसिद्धः। तिंतिडीकमम्लिका। द्वयोरपि कुडवं
चत्वारि पलानि। अत्रापि च मूत्रकुडवद्वितयं। गोमूत्रस्याष्टौ पलानि द्विगुणपरिभाषात्रकुड नी०टी०
वाद्ध्वं क्रियत इति। मिश्रिराठरामठकसिंधुयुतं कर्त्तव्यं। मिश्रिः शतपुष्पा। राठं मदनफ ६२
लं। रामठं हिंगु। सिंधु सैंधवं। एषां पलेन संयुक्तं। मावरणोद्भूतं। निरामे तैलपलाचितं। अ

स्तुक्ताम्लम्यत्र मांसरसक्षीरकांजिकादीनि स्नेहकानि प्रक्षिप्य दातव्यं। तथा च हारीतः। स्निग्धे गुडो
मांसरसः पयोंऽम्लमाम्लं निमूत्रं मधुसैंधवं वा। एतान्यनुक्तान्यपि दापयेत युक्ते निरूहे मदनात्फ
लेन। एरंडाद्यवलाद्यरग्वधाद्येषु प्रसिद्धेषु विद्यमानेष्वपि। यत्रिमूत्रवस्ति श्रीसटाचार्येण
क्ता। स्नेतिरपायेद्वात शीघ्रमागछतीति। कदाचित्तेन निरामयः। सन् एरंडादिभिरधिक्रियते।
तेषां च सामान्याकल्पना सर्वार्थे व्याख्यातामयोच्यते। निरूहस्य प्रमाणं चतुर्विंशतिप
लानि। तथा च पराशरः। निरूहस्य प्रमाणं तु प्रस्थः पादोत्तरः परं। मध्यमं प्रस्थमुद्दिष्टं हीनं
च कुडवास्त्रयः। सुश्रुतचरकखरनादाः इति नामतं। चतुर्विंशतिपलानि परं प्रमाणं॥
तथा च खरनादः॥ अतऊर्द्ध्वं प्रवक्ष्यामि निरूहस्य प्रकल्पनां। द्वादशप्रसृतान्याद्ये ततोऽन्यास्तु
प्रकल्पयेत्। सर्वेष्वेव निरूहेषु मदनं च प्रदापयेत्। स्नेहं गुडं माक्षिकं च लवणं चापि युक्तितः।

पक्काद्रोणे पलांशानि क्वाथ्यान्यष्टौ पलानि च। शिष्टः क्वाथस्त्रिवस्त्यार्हं बस्त्यावेकैकशस्त्रिधा। षडं
शे नैव वातादीनुद्दिश्यान्वीत्यकल्पयेत्। नातिसांद्राठजलोऽप्यस्नेहनागैर्मलं प्रति। मधुयुक्त्या गु
डपलं कर्षार्द्धं लवणस्य च। निरूहे स्नेहभागः स्यात् पित्ते वापि पलाष्टकं। वाताधिके चतुर्भागं प्रस्
तिष्ठेत्तु पित्तवत्। दधिमस्तु रसक्षीरगोमूत्रबदरादयः। यस्मिन्निरूहे निर्दिष्टाः प्रमाणं नवकी
र्तितं। तस्मिन्दोषाधिकं दृष्ट्वा युक्त्यामं विभजेद्भिषक्। मदनानां विमृद्यांशं क्वाथ्यक्षीररसादिषु॥
शास्त्रप्रमाणविन्यासं कल्पयेद्गुरुशिक्षया। तं बस्तिं सर्वसंयुक्तं द्वादशप्रसृतोन्मितं। षजेन
मथितं भ्रतं दशदोषविवर्जितं। नेत्रे सवस्त्रौ प्रक्षिप्य वर्त्तिकां द्वारपीडितां। उत्क्षाप्य निर्बला
बध्वा दृढीवासव्यपाणिना। कनिष्ठिका धृतं नेत्रं पिधायांगुष्टकेन तं। बस्तिं च दक्षिणान्यस्य ६३
पाद्यावायुर्विसर्जयेत्। अथ जीर्णान्नमरूमं संयुक्तं समवेगिनं। देशे निवाते स्वभ्यक्तगात्र
मा

मीषदुत्क्षितं। निरिधनाग्निमंतापास्तित्रेकोष्टसमाश्रितं। प्रविलीने कफे वापि जीर्यमाणे निरूहयेत्
इति। शुश्रुताचार्येणापि वातादिविभागेन माक्षिकादीनां प्रमाणमुक्तं। त्रिषट्वेकाष्टचत्वारः क्रताद्विक्षौ
काद्विगुणाः। षट्त्रिद्व्येकाष्टचत्वारः प्रतिपत्काव्यवस्थिताः। वाते पित्ते कफे क्षौद्रं स्नेहः कल्को गुडादयः। क्वा
थो वायोः पृथक् वस्तिश्चतुर्विंशतिकः पलैः। वाते गुडः सिता पित्ते कफे सिद्धार्थकादयः। कल्कावापरस
क्षीरस्त्रत्रप्रायं द्रवं क्षिपेत्। सुश्रुताचार्येणापि मामान्येनैव सैंधवादीनां प्रमाणमुक्तं॥ ॥द्वचाष्टौ
सैंधवस्याक्षं मधुनः प्रसृतिद्वयं। विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतत्रयं। एकीभूते ततः स्नेहे कल्कस्य
प्रसृतं क्षिपेत्। संमूर्छिते कषायं तु चतुःप्रसृतसंमितं। वितरेच्च तथावापं अंते द्विप्रसृतोन्मितं। एवं
प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत्। ज्येष्ठायाः खलु मात्रायाः प्रमाणमिदमीरितं। अपक्वामेतमि
षकुर्यात् वत्त्प्रसृतहापनं। यथा वायान्निरूहाणां कल्पनेयमुदाहृता। सैंधवादि द्रवांतानां सि

ह्रिकामैर्भिषग्वरैः॥इति॥तस्यनिरूहस्यसुश्रुताद्भिःशल्यतंत्रकर्तृभिःउक्तःशदोषहरसंशम(
नबस्तिषुटपाकदानमित्यनेनक्रमेणकल्पनाश्रीयते॥तथाचसुश्रुतः॥दृष्टाउक्तेःशनंसर्व
मध्येदोषहरंपुनः॥पश्चात्संशमनीयंचबृंहणायाद्धिविचक्षणः॥एरंडबीजंमधुकंपिप्पलीसैंध
वंवचा॥हपुषाफलकल्कश्चबस्तिरुक्तःशनपरः॥रास्नात्वामधुकंबीजंकौटजंबीजमेवचामक
त्रिकः॥सगोमूत्रोबस्तिर्दोषहरःस्मृतः॥प्रियंगुमधुकंमुस्तानथैववचरसांजनं॥मक्षीरःशस्यतेब
स्तिर्दोषाणांशमनःस्मृतः॥इति॥तस्मिन्दत्तेदीनातिमस्यकूनिरूहलक्षणंसुश्रुतेनोक्तं॥प्र
स्यात्स्यवेगोविड्वातहीनोऽदीननिरूहलक्षणः॥मूर्छाशूलकफध्रायोमहावेगोनिरूहलक्षणः॥यस्तक्रमे
णगच्छंतिविट्पित्तकफवायवः॥लाघवंचोपजायेतसुनिरूढंतमादिशेत्॥सुनिरूढंततोजंतुंस्ना
तंभुक्तरसौदनं॥यथोक्तेनविधानेनयोजयेत्स्नेहबस्तिनिरिति॥तस्यसम्यकृदत्तस्यफलंचरको(

नी॰टि॰
६४

क्तसुवक्तोबस्तिर्वयःस्थापयितासुखायुर्बलाग्निमेधास्वरवर्णकृच्चसर्वार्थकारीशिशुवृद्धयूनांनिर
त्ययःसर्वगदापहश्च॥विट्श्लेष्मपित्तानिलमूत्रकर्षीदार्ढ्यावहःशुक्रबलप्रदश्च॥वृष्यःस्थितंदोषचयंनि
रस्यसर्वान्विकारान्शमयेन्निरूहः इति॥ ॥इदानींनिरूहानंतरंयतःसद्योनिरूढोऽनुवास्यइतिक्र
त्वाकदाचिद्विरेचनाद्दूर्ध्वंसप्तरात्रेऽतीतेऽनुवासनदानंषट्पलप्रमाणंशोक्तं॥तथाचसुश्रुतः॥विरे
कात्सप्तरात्रेगतेजातबलायवै॥कृतान्नायानुवास्यायसम्यग्देयोऽनुवासनः॥यथावायानिरूहाणांया
मात्रापरिकीर्तिता॥पादावशिष्टामाकार्यास्नेहबस्तिषुदेहिनामिति॥ढास्त्रतोऽनुवासनमाह॥
मगधमधुकामयविल्ववचामिशिपुष्करमूलहिंशीरसौमहिभिः॥मदनामरदारुयुतैर्विपचेत्पयसागु
त्य डबस्तिषुतैलमिदं॥ऊरुगुदजानुगुल्फगुदवस्तिकटीजठरांतरेषुपवनस्यरुजः॥विनिहंतिगुल्म
मतिसारगदान्ग्रहणीविकारमनुवासनतः॥७॥इदंतैलंपयसाक्षीरेणविपचेत्॥मगधादि

शा

मिश्रा॥ मगधापिप्पली। मधुकं यष्टीमधु। आमयं कुष्ठं। बिल्वं श्रीफलं। वचा षड्ग्रंथा। मिशिः शतपुष्पा
।पुष्करमूलं कुष्ठाकारं। शिखि चित्रकः। मठी कचूरः। मदनो राढफलं। अमरदारु देवदारु। एभिः पल
प्रमाणैः। तिलतैलपलान्यष्टाशीति द्विगुणक्षीरेण चतुर्गुणजलानि विपाच्य गुदबस्तिष्वनुवासने
षु तैलं विधेयं। गुदबस्तिग्रहणं शिरोबस्तिनिवारणार्थं। एतत्पुमुक्तं। मह्यादि प्रथममनुवास
नतैलं। वरकेण पिप्पल्याद्यमशीति कल्कितं च सिद्धमिति तन्त्रवार्त्ती माराचार्येणोक्तं। अस्य च फ
लं। गुदजान्यर्शांसि। गुल्मगुदग्रहणी जठरांतरे पुरुजो यान् विकारान् तान् विनिहंति। गुल्मादी
श्चा। अनुवासनतः। स्नेहवस्यपयोगतः। सचानु वासनो पुंके पुरोषाः एकदिवसांतरितो वि टी०टी०
धेयः। स्नेहवस्तिः। तस्मिंश्च दीयमाने शुंठी धान्यं वा पुनाते पेयमग्निसंधुक्षणार्थं रूक्षार्थं च। तथा ६५
च सुश्रुतः। प्रातरुष्णोदकं देयं धान्यनागरसाधितं। तेनास्य दीप्यते वह्निर्भक्ताकांक्षा च जायते। त

स्य हीनातिमात्रकृतस्य लक्षणं। विष्टब्धानिलविण्मूत्रः स्नेहे हीनेऽनुवासने। दाहक्लमप्र
वा हार्तिकरश्चात्यनुवासने। सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु। ऊषचोषौ विना शीघ्रं स सम्य
गनुवासितः। तस्य च फलं वरकेणोक्तं। स्नेहे निषिक्तो हि यथाङ्कुरः स्यात् नीलच्छदः कोमलपल्ल
वा ग्रः। काले महान् पुष्पफलप्रदश्च तथा नरः स्यादनुवासनेन। सुश्रुतेनाप्युक्तं। बस्तिर्वाते
च पित्ते च कफे रक्ते च शस्यते। संसर्गे सन्निपाते च बस्तिरेव हितः सदा॥ ॥एवं संशुद्धशरीरस्य
कृतसंसर्जनस्य च स्विन्नशिरसः शिरोगतदोषनिर्हरणार्थं नस्यमाह।६। शिग्रुबीजस्य रमार्जक
बीजं विश्वजीरककणामरिचैश्च। नस्यमूर्धक्रमियोज्यमभीभिः। कानवी रुचकतुंबरुनिश्चा।७।ऊ
र्ध्वरुजि शिरोविकारे। वातश्लेष्मजे नस्यप्रयोजनीयं। अभीभिः द्रव्यैः। शिग्रुबीजादिभिः एकशो।
द्विशस्त्रिशः सममात्रैर्वा। कल्कपिष्टैः शिरोविरेचनं कार्यं। चित्रमत्रैस्तैलं पक्त्वा स्नेहिकं नस्यं कर्तव्यं।

शिग्रुः शोभांजनकः॥ तस्य बीजानि॥ मधुरसः प्रसिद्धः॥ अर्जकः कुठेरकः॥ द्वयोरपि बीजानि॥ विश्वं शुं
ठी। जीरकः अजाजी। कणा पिप्पली। मरिचमूषणमिति। न केवलमेभिः। कारवी रुचकं तुंबरु विश्व
च नस्यं योज्यं। कारवी शतपुष्पा। अजमोदा वा। रुचकं सौवर्चलं। तुंबरु प्रसिद्धं। तच्च नस्यं पंचधा।
स्नैहिकः शिरोविरेकः प्रतिमर्शोऽवपीडनं। ज्ञेयं प्रधमनं चेति नस्यकर्म तु पंचधा। ततो नस्येत्रनेध्म
मं पिवे कफविनाशनं। हितान्नभुक निवातोस्मिन्नेवीस्यान्नियतेंद्रियः। विधिरेषोऽवपीडस्य कार्यः प्र
धमनस्य वा। नत्वड्ंगुलया नाड्या धमेच्चूर्णं मुखेन तु। विरिक्तशिरसं सम्यक् पाययित्वांबु भोजयेत्। स्नै
हिकनस्यस्य प्रमाणं। षोडशद्वात्रिंशच्चतुःषष्टिर्बिंदवस्तिस्रो मात्राः। तथाच मात्रामाह वृद्धविदेहः। नी०टी०
प्रदेशिन्यास्तु मग्ने द्वे पर्वणी च ततो गलन्। नस्यकर्मणि विज्ञेयो विषम्यि बिंदुसंज्ञितः। नस्यस्य स्नै ६६
हिकस्यात्र वैयाष्टौ च बिंदवः। प्रत्येकशो नस्यकार्ये तृणमिति विनिश्चयः। शुक्तिश्च पाणिशुक्तिश्च
द्वि

मात्रास्तिस्रः प्रकीर्तिताः। द्वात्रिंशद्बिंदवश्चापि शुक्तिरित्यभिधीयते। द्विशुक्तिः पाणिशुक्तिश्च ज्ञेया तत्र कु
शलैर्नरैः। नस्यस्य स्नैहिकस्यैतत्प्रमाणं विहितं तृणमिति। शिरोविरेकस्य प्रमाणं चतुःषडष्टौ बिंद
वस्तिस्रो मात्राः। तथाच तंत्रांतरं। चत्वारो बिंदवः षट् च तथाष्टौ वा यथाबलं। शिरोविरेचने योज्याः ऊर्ध्वज
त्रुविकारिणां। प्रतिमर्शस्यैव प्रमाणं। ईषदुच्छिंघितः स्नेहो यावद्वक्त्रं प्रपद्यते। नस्ये निषिक्तं तं विद्या
त् प्रतिमर्शप्रमाणतः। तच्च नस्यमेकदिवसांतरितं द्विदिवसांतरितं वा प्रयोज्यं। तथाच भोजः। एकां
तरं द्व्यंतरं वा नस्यं दद्याद्विचक्षणः। सप्ताहं तु परं देयं विश्रांतस्य तु नः पुनः। त्र्यहं पंचाहमथवा सप्ताहं
वा सुयंत्रितः। परं न वाहं मूर्धं तु न वाह्य तत्साम्यतां व्रजेत्। स्नैहिकनस्यशिरोविरेकयोः फलं वक्तुं स्ने
नोक्तं। पित्तानिलहरं केशपक्षोपचयवर्णकृत्। अस्मादनेत्रेंद्रियाणां स्नैहिकं नस्यमुच्यते। शिरोविरे
चनं नेत्रगलवर्त्मामयापहं। हितं मेदःकफग्रस्ते गौरवारुचिनं द्विषिति। तच्च नस्यं स्नात्रेयेण समव

वर्षादूर्ध्वं विहितं। सप्तवर्षमुपादाय नस्यकर्म चतुर्विधं। प्रतिमर्षः प्रधमनं जन्मप्रभृति शस्य
ते। धूमो द्वादशवर्षस्य कवलः पंचमे मतः॥ दोषव्याधिबलावस्थावीक्ष्य चैतत्प्रयोजयेदिति॥ त
स्य च फलं सामान्येन सुश्रुतेनोक्तं। न स्युर्नरोगाः शाम्यंति नराणां मूर्ध्नि जन्तुनाः। इंद्रियाणां च
वैमल्यं कुर्यादास्यं सुगंधि चारत्नुदंत। शिरोग्रीवात्रिकवाक्करस्कंधबलं। वली पलित खालित्य व्यंगा
नां चाप्यसंभवः। तैलं कफे सवाते स्यात् केवले पवने वसां। दद्यात्सर्पिः सदा पित्ते मज्जानं च समारु
ते। इतीदानीं वातादिरोगाणां सामान्येन पवनादिकां क्रियामुक्त्वा हरादीनां प्रत्येकं विशेषविकि
त्साविधिमाह॥ ॥इतीयमुक्ता पवनादिरोगिणां क्रियाक्रियान्यातदपि प्रवक्ष्यते। प्रतिहरादिप्र नी०टी०
विभक्तेनेषजैरं तच्चिकित्सा कति कानि च गम्यता।॥ इति शद्रः पारेसमाप्तोय यद्यपि सर्वोक्तप्रका ६७
रेण पवनादिरोगिणां वातादिरोगिणां इतीयं क्रिया संक्षेपेण क्ता। प्रवराचार्येण। क्रियते इति क्रि

या। तथापि अन्यापि क्रिया प्रवक्ष्यते। कस्मात्। यत इयं सामान्येनोक्ता। न विशेषेण। इयं च वक्ष्य
माणा विशेषेण हरादिषु प्रविभक्तेनेषजैः। प्रकर्षेण विभक्तैर्भेषजैः औषधैर्वक्ष्यते। अतः अस्मा
त्कारणात् चिकित्सा कति कानि च गम्यता। भिषजां वैद्यानां मता संमता। यस्मात् स्याद् दोषविशेष
ण हरादिरोग विशेषेण च चिकित्सितमुक्तमिति॥ ॥सांप्रतं श्रेष्ठं येषां रोगिणां लंघनं प्रवीचा
र्येणोक्तं तदाह॥ आदौ हरे हरवतः कफजे विशेषादामातिसारिणि च शोणितपित्तरोगे। ऊर्ध्वे
शिरोरुजि बलासमसुरवायां नेत्रामयेषु कफजेषु विसूचिकायां॥७७॥ विस्फोटकामयिनि वक्त्र
विकारवत्सु मद्यः प्रसूतवनितासु वशो फलस्तु समघः तेषु स्मृतं लंघनमुद्दिशन्ति वैद्याः यथा
बलमजीर्णविकारिणां वा॥७८॥ वैद्या लंघनमुद्दिशन्ति। हरादिषु। आदौ प्रथमं हरवतः। हरो
विद्यते यस्यासौ हरवान् तस्य। हरे सति। कफजे हरे विशेषात् विशेषेण लंघनं। आमातिसारि

णि च सामे ऽतिसारे। शोणितपित्तरोगे रक्तपित्ते। छर्द्यां वम्यां। शिरोरुजि मस्तकरुजि। बलासमसमुद्भ वि॰ क्र
वायां। द्वयोरपि विशेषणं। नेत्रामयेषु च लोचनविकारेषु कफजेषु। विसूचिकायां। अलसे। विस्फोटका
मयिनि विस्फोटविकारवति। वक्त्रविकारवत्सु मुखविकारसमेतेषु। सद्यः प्रसन्नवनि[illegible]तासु च॥ स
द्यः सन्नरात्रं प्रसक्तासु वनितासु स्त्रीषु न चिरकालं। शोफवत्सु श्वयथुवत् शोफसमेतेषु। सद्यः क्षतेषु। सद्यो
व्रणेषु। व्रणयुक्तेषु। तृष्णु प्राणिषु। एषां सर्वेषामेव च लंघनमुद्दिशंति। उपदिशंति। वैद्या भिषजः। तच्च य
था बलं। यावन्मात्रं बलं। तथा च चरकाचार्यः॥ प्राणविरोधिना चैनं लंघनेनोपपादयेत्। बलाधिष्ठानमा नि॰टी॰
रोग्यं यदर्थोयं क्रियाक्रम इति॥ ॥अजीर्णविकारिणां च प्राणिनां लंघनमुद्दिशंतीति॥ सर्वेष्वरादिषु लं
घनं विदितमतः सुलंघितलक्षणमाह॥७॥ विण्मूत्रवातसरणे तनुलाघवे च तंद्रीक्लमे च विरते वपु ६८
षः पटुत्वे। उद्गारवक्त्रविवरोदरहृद्विशुद्धौ स्वेदोऽरुचेः समतिवत्स्यशनाभिलाषे।८। इत्येतदातुरसुलं

घितलिंगमंगे स्य स्थिरवधार्य विचार्य बुध्या। तद्दोषदेशबलकालविकारसात्म्यमुद्दिश्यते तदनुपथ्य
मौषधं च॥९॥ निषग्भिर्वैद्यैरेतत्पूर्वोक्तमातुरं सुलंघितलिंगमंगे सम्यक् कृत्यथावदवधार्य बगम्य
बुध्या प्रज्ञया विचार्य। कानि। तद्दोषदेशबलकालविकारसात्म्यानि। तस्यातुरस्य दोषा वातादयः।
देशश्चानूपजांगलसाधारणरूपः। बलं शारीरमोजः संज्ञं च। कालं शिशिरादिकं। विकारा ज्वरादयः।
सात्म्यं रुच्यादिकं। एतत्सर्वं विचार्य निरूप्य तदनु तदनंतरं च पथ्यमौषधं च वक्ष्यमाणकमुद्दि
श्यते। कस्मिन् सति। सुलंघितलिंगे। विण्मूत्रवातसरणे। विट् च मूत्रं च वातश्च। विण्मूत्रवाताः। ते
षां सरणे गमने। अनिबद्धे। विट् पुरीषं। तनुः शरीरं। तस्य लाघवे लघुत्वे। तंद्रीक्लमे च विरते। तंद्रा नि
द्राविशेषः। क्लमो मूर्छाविशेषः। तंद्रा च क्लमश्च तंद्रीक्लमं। तस्मिन् विरते विगते। वपुषः शरीरस्य पटुत्वे
निर्विकारत्वे। उद्गारवक्त्रविवरोदरहृद्विशुद्धौ। उद्गारश्च वक्त्रविवरं च उदरं च हृच्च उद्गारवक्त्रविवरोद

रङ्गरितेषांविशुद्धौ॥ अविज्ञतत्त्वोऽस्वेदोऽमेप्रस्वेदेमतिः॥ अशनाभिलाषेचाजोजनकांत्वायांचइत्येतदा
तुरसुलंघितलिंगमिति॥ ॥पूर्वमुक्तमुद्दिश्यते तदत्रपथ्यमिति॥ तत्रपथ्योदनमांसरसशाकादिकं
अनेकप्रकारमाह॥ पथ्यैःपुराणशालिषष्टिकरक्तशालिमृद्वोदनैःसघृतमुद्गमसूररसयूषैः॥ गोधूममंड
कयुतैर्यवसक्तुभिश्चसाजाजिसैंधवघृतैरथतक्रयुक्तैः॥ ९१॥ लावैणतित्तिरिकपिंजलकेकिकूर्म
गोधाशशाककरमांसरसैःसमांसैः॥ स्वादुदाडिमरसैःपिशितप्रदेहैर्दुग्धैःशृतैरपिचशर्करया
समेतैः॥ ९२ शाकैःकलायलघुमूलकतंडुलीयचिल्लीपटोलदलवास्तुककाममर्दैः॥ वार्ताकिचुच्चुफ
लशाकयुतैःप्रकारैरेभिःकृतैरितिनृणांनभवंतिरोगाः॥ ९३ एभिःपूर्वोक्तैःप्रकारैःकृतैर्नृणांरोगान
भवंति॥ मितषष्टिकश्चरक्तशालिश्चमितषष्टिकरक्तशाली॥ पुराणौचतौमितषष्टिकरक्तशालीच
पुराणमितषष्टिकरक्तशालिश्चपुराणमितषष्टिकरक्तशाली॥ तयोर्मृद्वोदनानिपुराणमितषष्टि नी०टी० ६९

करक्तशालिश्चपुराणमितषष्टिकरक्तशाली॥ तयोर्मृद्वोदनानिपुराणमितषष्टिकरक्तशालि
मृद्वोदनानितैः॥ मुद्गश्चमसूरश्चमुद्गमसूरौ॥ तयोःसूपैर्मुद्गमसूररसयूषैः॥ घृतंचमुद्गमसूररसयूषौचघृ
तमुद्गमसूररसयूषौ॥ ताभ्यांसहवर्तंतेयान्योदनानिसतानिसघृतमुद्गमसूररसयूषानि॥ तैः॥ गोधूममं
डकयुतैः॥ गोधूमानांमंडकाःगोधूममंडकाः॥ तैर्युतानिपथ्यानि॥ अतस्तैर्गोधूममंडकयुतैः॥ यवस
क्तुभिश्चपथ्यैः॥ साजाजिसैंधवघृतैः॥ अजाजीजीरकं॥ सैंधवंमाणिमंथं॥ घृतंगव्यं॥ सहतैर्वर्तंते
यानिपथ्यानि॥ तानिसाजाजिसैंधवघृतानितैः॥ अथतक्रयुक्तैः॥ तक्रंमथितं॥ तेनयुक्तैः॥ लावादि
जिमांसरसैश्च॥ लावश्चएणश्च॥ एणःकृष्णहरिणः॥ तित्तिरिश्च॥ तित्तिरिःप्रसिद्धः॥ कपिंजलश्चकपिंजलो
श्रीः गौरतित्तिरिः॥ केकीचकेकीमयूरः॥ कूर्मश्चकूर्मःकच्छपः॥ गोधाचशशश्चककरश्चककरोवर्तकः॥
कपिंजलात्पृथुः॥ लावैणतित्तिरिकपिंजलकेकिकूर्मगोधाशशककराः॥ तेषांमांसानि॥ तैःरसाःतै

समांसैः॥ मांसमसृहितैः। पिशितं मांसं तेन प्रदेहाः॥ तैः। सस्वादुदाडिमरसैः प्रदेहैः मांसरसैश्च स्वादु मधुर
दाडिमानस्य रसः स्वादुदाडिमरसः॥ परस्वादुदाडिमरसेन वर्त्तंते प्रदेहाः। मांसरसश्च तैः। दुग्धैश्च
रैः॥ घृतैः क्वथितैः॥ शर्करया समेतैः दुग्धैरिव शाकैश्च कलायादिभिः॥ कलायश्च लघुमूलकं च मूलकपो
तिका। तंडुली यश्च चिल्लीच॥ चिल्ली हेत्रवास्तुकः॥ पटोलं वदलं च पत्रं पटोलस्यैव। वास्तुकश्च कासम
र्दश्च कलायलघुमूलकतंडुलीयचिल्लीपटोलदलवास्तुककासमर्दाः। तैः॥ वार्त्ताकिं भंडकः॥ पुष्पफलं
कूष्मांडं॥ नरास्यानि शाकानि॥ तैः कृत्ताः संस्कृता येप्रकाराः॥ एभिः सर्वैरिबोदनादिभिः पथ्यैः कृतै गोच
रितैः रोगा नन्नवंतीति॥ ॥ नन्वन्नंतं एतत्सर्वोक्तं पथ्यं सामान्येनोक्तं सर्वविकारिणां॥ यद्यस्य योगिकं
तत्तस्मै प्रदेयमित्याह॥ यद्यस्य योगिकमिति प्रविकल्प्य पथ्यं तस्मै तदेव भिषजामयिने प्रदेयं॥ इ
त्यातुरस्य निरुजोऽर्थ्यैनित्यमन्नान्यथो वधस्तु पाचरतो न रोगाः॥ ९॥ अथायत्स्य पथ्यं पूर्वोक्तानां मध्यात्तय वै०टी० १०
जीवनस्य।

स्यातुरस्य योगिकं। युक्त्या बुध्यते इत्येतेन तत्प्रविकल्प्य। तस्मै आमयिने विकारिणे तदेव भिषजा प्र
देयं। प्रदातव्यं। इत्यातुरस्य विकारिणो जनस्य लोकस्यानिरुजो निर्गतविकारस्य नित्यं सर्वदा अ
न्नानि पूर्वोक्तानि पथ्यानि। अथ धवंच पूर्वोक्तं वक्ष्यमाणकं। उपाचरतः उपयोगं कुर्वतः रोगाः नन्नवं
तीति॥ ॥ पूर्वमुक्तं ज्वरातिसारादिप्रविनक्रमेण जैरन्याक्रिया वक्ष्यते। ते षांच ज्वरादीनां येन क्रमेण चि
कित्सितमुच्यते तदुद्देशार्थमाह॥ १०॥ ज्वरातिसारग्रहणीविकारिणां ततोऽर्शसां चापि भगंदराव
तां॥ सशोफरोगोदरगुल्मरोगिणां प्राविद्रधीनां गलगंडमालिनां॥ ११॥ विस्फोटकश्लीपदवातर
क्तिनां विसर्पकुष्ठामयिनां क्रिमिलिनां। प्रमेहिणां पांडुविकारिणां तृष्णाश्वासकासामयरक्तपि
त्तिनां॥ १२॥ मदात्ययहृद्रोगिहिक्किशूलरोगिषु मोक्तं हृदावर्त्तिषु मूत्रकृच्छ्रिषु। मराजयक्ष्मिक्रिमिषु प्रक
त्रिनं चिकित्सितं कायचिकित्सितेमया॥ १३॥ मया कायचिकित्सिते चिकित्सितं। ज्वरादीनां प्रकीर्त्तितं। ज्व

ज्वरश्चातीसारश्च ग्रहणीविकारश्च ज्वरातिसारग्रहणीविकाराः। ते ज्वरातिसारग्रहणीविकाराः संति
येषां ते तथा। तेषां ततोऽनंतरमर्शसां। अर्शसोनं तरं जगंतरावतां। शोफरोगश्च उदरं च गुल्मरोगि
णश्च ते तथा। मद्शोफादिनिवर्त्तते ये ज्वरादयस्तेषां मविद्रधीनां। तेषामनंतरं गलगंडमालिनां। गंड
श्च गंडमाला च गलगंडमाले ते विद्येते येषां ते गलगंडमालिनः तेषां। एकस्य गंडशब्दस्य लोपो द्रष्टव्य
ः। इहरूपं ते च तंत्रेषु। आदिमध्यांतलोपाः। तदनु विस्फोटकाश्च श्लीपदानि च। वातरक्तं च। तानि विद्यंते ये
षां ते तथा तेषां। विसर्पश्च कुष्ठामयश्च विसर्पकुष्ठामयौ। तौ विद्येते येषां ते विसर्पकुष्ठामयिनः। ते
षां। ततोऽनु किलासिनां। श्वित्रिणामित्यर्थः। ततोऽनंतरं प्रमेहिणां। पांडुविकारिणां नृणां। श्वासका नी॰टी॰
सामयरक्तपित्तिनां। श्वासश्च कासामयश्च श्वासकासामयौ। रक्तपित्तं विद्यते येषां ते रक्तपित्तिनः। श्व ७१
श्वासकासामयाभ्यां रक्तपित्तिनः। श्वासकासामयरक्तपित्तिनः। तेषां तृट् तृष्णा। वमी छर्दिः। हिक्का

हिध्मा। एता विद्यंते येषां ते तृड्वमीहिक्किनः। सतृड्वमीहिक्किनि वर्त्तते इति सतृड्वमीहिक्किनः। के ते शूलरो
गिणः। तेषु सतृड्वमीहिक्किषु शूलरोगिषु। उदावर्तिषु च मूत्रकृच्छ्रिषु च। पराजयक्ष्मिकृमिषु पूर्वोक्तेषु॥ ए
षामवेषां प्रोक्तं चिकित्सितं। कायचिकित्सितं समयेति॥ ॥कायचिकित्सितानंतरं शालाक्यादीनां उद्देशमा
ह॥ ७॥ शालाक्यशल्यामयभूतविद्या कौमारतंत्रं विषतंत्रमुक्तं। रसायनं तंत्रमनंतरं च वाजीकरं तंत्रम
पि प्रदिष्टं॥ ७॥ कायचिकित्सितानंतरं शालाक्यं। तदनंतरं शल्यामयं। तदनंतरं भूतविद्या। ततः कौमार
तंत्रं। तत्र शब्दस्यांते परिपठितत्वात्। शालाक्यादिभिः प्रत्येकमभिसंबंधः। अनंतरं विषतंत्रमुक्तं। तदनु
रसायनतंत्रं। अनंतरं च वाजीकरणतंत्रं। प्रदिष्टं उद्दिष्टमिति॥ ॥एवं क्रमेणोद्दिश्य ज्वरादीन् यथो
द्देशं ज्वरस्य चिकित्सितमाह॥ ८॥ आलस्यमस्वेरमरोचकार्त्तमुन्निद्रमानद्धमनिद्धवह्निं। सांगव्यथं सा
ममिति ज्वरार्त्तमभोजनेन रूक्षान्नभोजनैश्चिकित्सेत॥ ८॥ सद्दे निर्द्दिष्टं ज्वरार्त्तमभोजनेन उपवासैः उ

ष्णजलैः उष्णोदकपानैः चिकित्सेदिति॥ कालस्यां मद्॥ आलम्बेन वर्त्तत इति कालस्यः॥ तां अन्वेदं न्वे
दे नविघ्नयस्यतमन्वेदं॥ अरोचकार्त्ते॥ अरुचिपीडिते॥ उन्निद्रे॥ उज्जतनिद्रे॥ आनद्धे ततोदरे॥ अनिद्ध
वह्नौ॥ अदीप्ताग्नौ॥ सांगव्यथे॥ शरीरपीडार्त्ते॥ इत्येवं समं ज्ञात्वा॥ वैद्यः उपवासैरुष्णोदकपानैश्चिकि
त्सां कुर्यादिति॥ एवमुष्णजलैश्चिकित्सेदित्युक्तं सामान्येन सांप्रतं अवस्थाविशेषेण विशिष्टद्रव्यसं
स्कृतं शीतमुदकमाह॥ दाहच्छर्दिदाहमुखशोषसमन्वितः स्यादेभिः षडंगगणसंगसुगंधिभिस्तोया
म्बुपर्पटकपद्मकचंदनह्रीवेरवारिभिरनुष्णतमैश्चिकित्सेत्॥५०॥ ज्वरार्त्तमित्यनुवर्त्तते॥ य
दि तृड्दाहादिभिः संयुक्तः स्यात्तन्मन्वेत्। तदा तं ज्वरार्त्तं आतुरं षडंगगणसंगसुगंधिभिश्चिकित्सेत्॥ षडंगानि य ती॰टी॰
प स्य स षडंगः॥ षडंगश्चासौ गणश्च षडंगगणः॥ तस्य संगः प्रयुक्तता॥ तेन सुगंधीनि तैः॥ नामरूपपर्पटकपद्म ९२
कचंदनह्रीवेरवारिभिः॥ नामरूपमुशीरं॥ पर्पटकं रेणुः॥ पद्मको मलयमारुतः॥ चंदनं रक्तचंदनो अदं

उशीरं॥ ह्रीवेरं वालकं॥ एभिः संस्कृतानि यानि वारीणि तैः॥ अनुष्णतमैः॥ न उष्णानि अनुष्णानि बहूनां मध्ये अति
शयेनानुष्णान्यनुष्णतमानि॥ तैः॥ अतिशयेन शीतैः॥ चिकित्सेदुपक्रमेत्॥ अत्र चोदकव्यवस्था सर्वेषां पलेन
दकमुदकस्य प्रस्थाद्यमर्द्धविशेषं शीतं प्रयोज्यं॥ तथा च तंत्रांतरे॥ यदप्सु शृतशीतासु षडंगादि प्रयुज्यते॥ कर्ष
मात्रं ततो द्रव्यात्क्वाथयेत्प्रास्थिकैः [illegible]॥ अर्द्धशृतं प्रयोक्तव्यं पाने पेयादिसंविधौ॥ इति॥ एवमुक्तं अनो
ष्णैश्चिकित्सेत्॥ तत्र भोजनं कियत्कालं यावदित्याह॥ बलाविरोधेन ज्वरतापतर्पणस्ततो दिनस्यापगमे
बुभुक्षितः॥ गतामदोषः पवनादिजह्रीविधिं विदध्यादिति पथ्यभेषजं॥५१॥ वातादिज्वरहरीविधिं विदध्यात्॥
ज्वरतापतर्पणः॥ ज्वरं अपतर्पणं लंघनं येन स ज्वरतापतर्पणः॥ केन प्रकारेण॥ बलाविरोधेन॥ बलं प्राणः॥ प्राणा
विरोधेनानतिक्रमेण॥ तथा च चरकः॥ प्राणाविरोधिना चैनं लंघनेनोपपादयेत्॥ इति॥ ततोऽनंतरं दिनस्य अप
गमे दिवसगते॥ बुभुक्षितः क्षुत्संयुक्तः॥ लंघितः॥ गतामदोषः॥ गता आमादोषा यस्य स गतामदोषः॥ को

ऽसौ पवनादिजक्षरीति। इति विधिविधानं वक्ष्यमाणं पथ्यं भोजनं भेषजमौषधं विदध्यात् कुर्यादिति॥ ॥
एवं विधिं विदध्यादिति। पथ्यं भेषजं चेत्युक्तं। लंघनानंतरं यवाग्वादि पथ्यं क्रमेणाह॥ ॥ सजीरकुस्तुंबरुकं-
टकारिकात्रिकंटकैः षष्टिकतंडुलैः कृतां पिबेद्यवागूमथ वा दुरालभानिर्दिग्धिकांभःशृतशालितंडुलां
॥१०२॥ षष्टिकतंडुलैः कृतां पिबेत् यवागूं। सजीरकुस्तुंबरुकंटकारिकात्रिकंटकैः शृतामिति। जीरकम
जाजी। कुस्तुंबरु धान्यकं। कंटकारिका निदिग्धिका। त्रिकंटकं गोक्षुरकं। सह जीरकादिभिर्वर्तंत इति
सजीरकुस्तुंबरुकंटकारिकात्रिकंटकाः शृताः षष्टिकतंडुलाः तैः कृता। संस्कारकरणं च विदेहोक्त-
परिभाषया। सर्वेषां तु पलं चैकं हिंगुमाषकसंयुतं॥ सुधौतं जर्जरीकृत्य तोयाढकसमन्वितं। पचेद श्रा० टी०
र्धावशेषं तु मंदाग्नौ पिठरे नवे। तंडुलानां पलान्यष्टौ तस्मिन् दत्त्वा समावपेत्। मंडपेयाविलेपीनामोद- १३
नस्य साधनं। षडंगयूषयवागूनामितरेषां च कीर्तितमिति। अनया परिभाषया सर्वत्र मंडपेयायवागू-

र्वेदीनां साधनं कर्तव्यमिति॥ अथवा द्वितीययवागूमाह॥ दुरालभानिर्दिग्धिकाभ्यां संस्कृतं यदं-
बु तेन शृतास्तंडुला यस्यां यवाग्वां सा तथा। तां पिबेत्॥ ॥ सांप्रतं कफहरस्य विशेषेण पथ्यमाह॥
सशीतनिशारुविगौरवाधिकं कफहरं मुस्तनागरकोद्रवैः। सरुट्तृड्वमीदाहमनल्पपित्तजं जयेत्सिता
माक्षिकलाजसक्तुभिः॥१०३॥ कफहरं जयेत्। कीदृग्गुणविशिष्टं। सशीतनिशारुविगौरवाधिकं। सह
शीतेन निशा सशीतनिशा सशीतनिशा वरुविश्व गौरवं च सशीतनिशारुविगौरवाणि। तान्यधिका-
नि यस्मिन् कफहरे। स तथा। तं जयेत्। कैः। मुस्तलैः संस्कृतमुदकं मुस्तवदनोदकं तेन सह उदनानि मु-
स्तलोदकोदनानि तैर्जयेदिति। अनल्पपित्तजं बहुपित्तजं। सरुट्तृड्वमीदाहं। रुट् तृट् वमी च दाहश्च रुट्तृड्वमीदा-
हाः। सह एतैर्वर्तत इति सरुट्तृड्वमीदाहः। तं च सितामाक्षिकलाजसक्तुभिर्जयेत्। सिता शर्करा। माक्षिकं मधु।
लाजसक्तवो रक्तशालिभृष्टाः कलमानां च शालीनां भृष्टानां क्षुण्णचूर्णानीति॥ सांप्रतं निरामस्य वातहरस्य मां-

सरसमाह॥७॥शशलावसारंगमयूरतित्तिरिप्रकल्पितैर्मांसरसैः सदाडिमैः।मरुकूपकं पिपवनप्रको
पजं प्रणाशयेत्प्राणान्नृत्तामिति ज्वरं।धापवनप्रकोपजं ज्वरं प्रणाशयेत्।धाप्राणनृत्तां प्राप्तिनामिति।ए
षां लावादीनां मांसरसैः।लावो विष्किरविशेषः।सारंगो हरिणजातिः।मयूरो बर्ही।तित्तिरिः प्रसिद्धः।लावा
दिभिः प्रकल्पिता ये मांसरसाः।सदाडिमाः।तैः मरुकूपकं पं।मरुकूपकं पश्चमरुकूपकं पं।सदृत्ताभ्यां व
र्त्तत इति मरुकूपकं पः।तं मरुकूपकं पं।पवनप्रकोपजं।वातप्रकोपजं ज्वरं प्रणाशयेद् विनाशयेदिति
मां सरसश्च विदेहो क्रयाकल्पयासाध्यते।स्नेहाद्वचतुर्गुणं मांसं मांसादष्टगुणं द्रवं।सौरसं स्नेहपादेन तत्तु
ल्यं लवणं स्मृतं।स्नेहार्द्धेनार्द्धकं दद्यात् कल्पितं लवणीकृतं।स्नेहात्याद्दाईमानेन योजयेत्कामसमर्द्दकं।
यूपं तु तत्तोर्द्धेन तत्पादेन तु रागमं।कुर्यात्स्नेहसमं मन्दं फलाम्लं पाकसंविधौ।पेयायूषरसादीनां प्र
माणं यत्र नोदितं।तत्रेयं कीर्त्तिता मात्रा बलेनामितते जसेति।इदानीं तत्पेयादिक्रमं ज्वरस्योपन्यस्य

वै०टी०
१४

४

मार्थं दशराजाहर्द्धं पावनं शमनान्योगानाह॥ ॥ततश्च विश्वाश्छदुरालभामृताःकिराततुःस्पर्शपयोद
पर्पटाः।वृषाश्च विश्वौषधपक्वयामकाःसमीरणादिज्वरनाशनाःस्मृताः॥१०॥ानतश्चपथ्यादिक्रमानंत
रं समीरणादिज्वरनाशनाय यथासंख्येन विश्वादयस्त्रयो योगाः स्मृताः सर्वाचार्यैः।विश्वादीनामितरेतर
द्वंद्वः।विश्वं शुंठी।अब्दं मुस्तं।दुरालभा दुःस्पर्शाः।अमृता गुडूची।वातजे ज्वरे।किराततिक्तकं।दुःस्प
र्शो धन्वयासकः।पयोदं मुस्तं।पर्पटः कल्याणकः।पित्तजे ज्वरे।वृषो वासकः।अब्दं मुस्तं।विश्वौषधं शुंठी।
धन्वयासको दुरालभा।श्लेष्मजे ज्वरे इति॥७॥इदानीं सर्वज्वराणां सामान्येन विश्वादिकं योगमाह॥ ॥
विश्वामृतावासककंटकारिकापलं पलैः षोडशभिर्जलस्य।क्वाथीकृतं तत्र वराणवशोषितं सपिप्पलीचूर्ण
मिदं ज्वरापहं॥११॥इदं विश्वादीनां पलं ज्वरापहं न तु सं विश्वादीनां प्रत्येकं कार्षिकैर्भागैः पलं षोडशभि
र्जलस्य उदकस्य पलैः क्वाथं जातं तत्र वराणव शोषितं पादावशेषं।वरा चारि पलानि क्वाथस्य।सपिप्पलीच

र्गुंमदपिप्पल्याश्चूर्णं कर्षेणि वृषमिदं ज्वरापहं भवति॥ ज्वरं सामान्यंश्च वा सर्ववातादिज्वरमपहंतीति
॥ इयमेव धान्यं गतं त्रपुष्का॥ अन्येषामपि पातव्यकषायाणां अनुक्तद्रव्योदकावशेषप्रमाणानां परिभाषां
क्रियते॥ तेन समस्तद्रव्याणां पलं अष्टेन तोयस्य षट्काथ्य पादावशेषात्रं नु तिः पातव्येति॥ तथा च तंत्रां
तरं। पेयानागादिकेकाथः पेयश्च स्वाद्युतुपलं। शीतज्वरसमयोरेषविक्षिद्वैयः कषाययोः। नेषजात्षोड
शगुणे जले क्वाथ्य पलं मतं। पादशेषं पिबेत्र क्षिम्रेहक्वाथोऽन्यथा भवेदिति॥ (ठा) सांप्रतं वातश्लेष्मज्वर
पद्मारोग्यं पंचकषायमाह॥ (ठा) तिक्तानयाग्रंथिकराजवृक्षैः सवारिदेरुक्कृथितः कषायः। पीतः समस्त
लासमसरुद्वलासज्वरापहः पाचनश्च। ३ तिक्तादिभिः क्वथितः कषायः पीतः सन्ज्वरापहो भवति। ति ज्व०टी०
क्ता कटुका। अनया हरीतकी। ग्रंथिकं पिप्पलीमूलं। राजवृक्षः किरमालकः तस्य शिंबिः। तैः सवारिदैः स ७५
मुस्तैः उत क्वथितः क्वाथीनृतः पीतः पानविधिना। समस्तलासमरुद्वलासज्वरापहः। मरुद्वायुः बलासः श्लेष्मा

३

मरुद्वलासाश्च मरुद्वलासौ। आमी चतौ मरुद्वलासौ च आममरुद्वलासौ तान्यांज्वरः। समस्तश्चासौ
आममरुद्वलासज्वरश्च समनघ्या। तमपहंतीति समस्तलाममरुद्वलासज्वरापहः। मरुद्वायुः बलासः श्ले
ष्मा पाचनो दोषाणां। दीपनश्चाग्नेरिति॥ ॥ इदानीं क्षुद्रादिकं व्याघ्र्यादिकं च ज्वरापहं योगद्वयमाह॥
क्षुद्राग्निपथ्यामलकैः कषायः क्षुतः समस्तज्वरहाग्निहेतुः। व्याघ्री गुडूची वृषजोऽथ कासश्वासज्वरघ्नश्च
सपिप्पलीकः॥ १०८। क्षुद्रादिभिः कृतः कषायः समस्तज्वरहा भवति। क्षुद्रा पिप्पली। अग्निश्चित्रकः। पथ्या
हरीतकी। आमलकं धात्रीफलं। समस्तान्वातादिज्वरानपहंतीति समस्तज्वरहा। अग्निहेतुः जाठराग्नि
कारणं। व्याघ्र्यादिभिश्च सपिप्पलीकः सपिप्पलीचूर्णः कासश्वासज्वरघ्नः। व्याघ्री कंटकारिका। कासश्च
श्वासश्च कासश्वासौ। तान्यांसहितो ज्वरः। तं हंतीति कासश्वासज्वरघ्न इति॥ सांप्रतं चंदनादिकं योगमा
ह॥ चंदनवालकतिक्तरोहिणीपयोदविश्वौषधकल्कितं जलं। अपीतमुग्रं सकलज्वरापहं प्रवर्धनं

जाठरज्ञातवेतसः॥१०९॥ दुरालभादिकल्कीकृतमुष्णं जलं पीतं सकलज्वरापहं नवं तीक्ष्णं दुरालभा अनंता
बालकं जलं तिक्ता कटुका पयोदमुस्तं विश्वं शुंठी। एषां कर्षेणोदकपिष्टेन कल्कीकृतं जलमुष्णं सकलज्व
रापहं। जाठरज्ञातवेदसः प्रवर्द्धनं। जठरमुदरं तस्मिन् भवो जाठरः। स चासौ जातवेदाश्च जाठरजातवेदाः
तस्य प्रवर्द्धनं शुद्धिकरं जातवेदा अग्निः॥ सांप्रतं गुडूच्यादिकं योगमाह॥ सकुंडलीपद्मकरक्तचंदनं स
निंबकुस्तुंबरुवारियन्त्रितं पिबेन्मनाक्पित्तबलासजं हरं जयेत्सदाहतापमरोचकाग्नितं॥११०॥ पुरुषः
पित्तबलासजंहरं जयेत्। यः कुंडल्यादिद्रव्यसमेतं वारिसृतं पिबेत्। कुंडली गुडूची। पद्मको मलयश्चारु
रक्तचंदनं हरिचंदनं। निंबोऽरिष्टः। कुस्तुंबरु धान्यकं। पित्तं च बलासश्च पित्तबलासौ ताभ्यां जातः पित्तब
लासजस्तं। सदाहतापा तापो दाहश्च तापश्च दाहतापौ सह दाहतापाभ्यां वर्त्तत इति सदाहतापस्तं। अरोचकाग्नि
तं अरोचकसमेतं। न तु मुख्यं तेन सर्वज्वरघ्नत्वमुक्तं गुडूच्यादिकस्य। एष सर्वज्वरान् हंतीति गुडूच्यादिमुदी औ०दी० ५६

र्णं। हृल्लासारोचकछर्दिपिपासादाहनाशनमिति। ननु कस्मान्नीमटाचार्येण पित्तश्लेष्महरत्वमुक्तं। अत्र
ोच्यते॥ सर्वज्वरघ्नत्वे सत्यपि विशेषतः पित्तश्लेष्महरत्वमुक्तं। कथितं विशेषेणावगतं। हृल्लासारोचकव
मीपिपासादाहनाशनोऽयमिति॥ ॥सांप्रतं संनिपातहरस्य योगद्वयमाह॥ निंबामृतादारुकटुकात्रिफ
लाहरिद्राद्वयपटोलदलनिःक्वथितः कषायः। पयस्त्रिदोषजनितज्वरनाशनाय क्वाथः समं मगधया द
शाम्लजो वा॥१११॥ निंबादिसृतः कषायस्त्रिदोषजनितज्वरनाशनाय पेयः पातव्यः। त्रिभिर्दोषैर्जनितस्त्रि
दोषजनितः। त्रिदोषजनितः स चासौ ज्वरश्च त्रिदोषजनितज्वरस्तस्य नाशाय विनाशार्थं। निंबः पिचुमं
दः। अमृता मुस्तं। दारु देवदारु। कटुका तिक्ता। त्रिफला [illegible]। हरिद्रा गौरी। [illegible] कंटकारिका। पटोलदलं
पटोलपत्रं। एतैर्निःक्वथितः कषायः पेयः। दशमूलजो वा क्वाथः समगधया पिप्पल्या सदा त्रिदोषजनि
तज्वरनाशनाय पेयः। ननु क्वथितः कषायः न कथं निःक्वथितग्रहणं। स्तनकषायपरिग्रहार्थं

घु ३

।शीतफांटादीनांनिवृत्त्यर्थमिति।निंबादियोगोयंमुक्तोऽन्नीभटाचार्येणोक्तः।तथाचमुक्तः।हरि
द्राम्बुमुस्तंचत्रिफलाकटुरोहिणी।पिचुमंदप[टो]लीचदेवदारुनिदिग्धिका।एषांकषायःकथितःसंनि
पातहरंजयेदिति॥ ॥इदानीमततान्येद्युष्क[तृ]तीयचतुर्थकादीनांविषमज्वराणांचिकित्सितमाह॥
॥ध्ना पटोलयष्टीमधुतिक्तरोहिणीघनाभयानिविषमज्वरापहं॥ततःकषायस्त्रिफलामृताह्वयैःए
यकृद्ध्वाविषमज्वरापहः॥१॥पटोलादिभिःकृतःकषायाविषमज्वरापहाभवंति।तिक्तरोहि
णीकटुका।घनंमुस्तं।अभयाहरीतकी।द्वितीयस्त्रिफलामृताह्वयैःकृतःकषायोविषमज्वराप ज्व०टी०
हः।हरीतक्यामलकविभीतकानित्रिफला।अमृतागुडूची।वृषोवासकः।एवंमिरेवंपटोलादिभिःद्वि
यकृद्दयोगेकैकशः।कृतःकषायाविषमज्वरापहाभवंति।विषमज्वरंचज्वराणांअनियतकालशीतोष्ण ११
(वि)कृतं।तथाचमेध्यांतरं।यस्मादनियताकालातशीतोष्माभ्यांतथैवचावेगतस्थानिविषमोज्वरः

सविषमःस्मृतइति॥ ॥इदानींतृतीयकस्यविशेषचिकित्सितमाह॥सनागरोशीरघनःसधान्यःस
पिप्पलीकःसमचंदनश्च।तृतीयकंहंतिकृतःकषायःसमाक्षिकश्चापिसशर्करश्च॥१३॥नागरादि
भिःकृतःकषायस्तृतीयकंहंति।सनागरोशीरघनः।नागरंचउशीरंचघनंचतानितथातैःसहवर्तत
इतिसनागरोशीरघनःकषायः।नागरंशुंठी।उशीरंलामज्जकं।घनंमुस्तं।सधान्यःसधान्यकः।स
पिप्पलीकश्चसचंदनश्च।पिप्पलीरक्तचंदनाभ्यांसह।समाक्षिकश्चापिसशर्करश्च।सनागरादिकृ
तःकषायःपीतोमाक्षिकशर्कराकर्षयुक्तःउपयुक्तःतृतीयकंज्वरंहंति।सांप्रतंचतुर्थकस्यवि
शेषचिकित्सितमाह॥ ॥पथ्याब्धिरानागरदेवदारुधात्रीवृषैरुत्क्वथितःकषायः।सितोपलामाक्षि
कमंत्रयुक्तश्चातुर्थकंहंत्यचिरेणपीतः॥१४॥पथ्यादिभिरुत्क्वथितःकषायश्चातुर्थकंहंति।पथ्या
हरीतकी।ब्धिरागज्ञात्रिपेषी।नागरंशुंठी।देवदारुःप्रसिद्धः।धात्रीआमलकी।वृषोवासकः।सितो

सितोपलामाक्षिकसंप्रयुक्तः। सितोपला शर्करा। माक्षिकं मधु। ताभ्यां कर्षेण संयुक्तः शीतः कषाय
:पीतो। चिरेणैव कालेन हंतीति॥ ॥इदानीमनयैवाद्यमेव विषमज्वराणां पिप्पलीवर्द्धमानमाह॥ ॥त्रि
भिरथपरिवृद्धं पंचभिः सप्तभिर्वा दशभिरथ विवृद्धं पिप्पलीवर्द्धमानं। इति पिबन्ति पुमान्स्तस्य न
श्वासकासज्वरजठरगदार्शोवातरक्तक्षयाः स्युः॥२४॥ यः पुमान् पिप्पलीवर्द्धमानं पिबति। तस्य श्वास
सादयो न स्युः न भवेयुः। पिप्पलीनां वर्द्धमानं पिप्पलीवर्द्धमानं। कथं त्रिभिः परिवृद्धं त्रिभित्रिभिः
पिप्पलीभिः परिवृद्धिः क्रियते। दशदिनानि यावत्। ततः पुनस्त्रिभिस्त्रिभिरपकर्षयेत्। यावत्त्रिप
:पिप्पल्यो भवंति। एवं पंचवृद्धिरपकर्षश्च। तथा सप्तवृद्धिरपकर्षश्च। तथा दशवृद्धिरपकर्षश्च॥ द श्री०र०
शादिनानि यावद्वृद्धिः। पुनरपि कर्षणं। क्रमेणैव कार्यो एवमेकोनविंशतिदिनानि प्रयोगो भवति। ता ९८
श्च क्षीरपिष्टाः क्षीरोदनाहारेण पातव्या इति। पूर्वोक्तेन न्यायेन यः पुमान् पुरुषः पिबति। तस्य श्वा

सादयो रोगा न स्युः न भवेयुः। त्रिपंचसप्तदशवृद्धिः स्वरकः शुष्कं तयोर्दृष्टवयो दोषापेक्षया। तथा च सु
श्रुतः। पिप्पल्यो वा क्षीरपिष्टाः पंचाभिवृद्ध्या सप्ताभिवृद्ध्या वा दशाभिवृद्ध्या वा पिबेत्। क्षीरोदनाहारो द
शरात्रं दशरात्रान्न्यूनश्चापकर्षयेत्। यावत्पंचसप्तदशवेति। एतत्पिप्पलीवर्द्धमानं वातशो
णितविषमज्वरारोचकपांडुरोगप्लीहोदरार्शःश्वासकासशोषशोफाग्निमांद्यहृद्रोगोदराण्यपहंति॥
चरकमुनिनाप्युक्तं। दशपिप्पलिकः श्रेष्ठो मध्यमः पंचकाभिः। यस्त्रिपिप्पलिपर्यंतः स कनीयान्
प्रकीर्तितः इति॥ उग्रसमानं तक्रं हारीतेन। त्रिपंचसप्तमगधाः प्रकुंचपयसा सह। पिबन्क्रमाद्वे
ली क्षपित्तवातकफान्जयेदिति। क्रमात्प्रकुंचेपयसेति। प्रकुंचवृद्धेन पयसेत्यर्थः। तथा च नोक्तः
त्रिपंचसप्तदशवा पिप्पलीः पयसा सह। प्रकुंचवृद्धेन पिबन्नरः शोकान्गदान्जयेत्। दोषदेशर्तुमा
त्मादिवशतो वायथाह इतामिति॥ एतेनैतदुक्तं भवति। तिस्रः पुनरयः प्रकुंचा पंचसुपंचसप्तसु

प्रदद्यादशपलानि पयसो नवं त्वेवमाह दृढः॥ क्रमेणोपचितश्चैवं तावत्पञ्चबलवह्निश्चूर्णितानां मध्यबलेन दश
षिता। पानव्याहृतिमेवहारयः। वचनमपि। नाः पिप्पलीभिः पेयाः श्टता मध्यबलेनैरेति चूर्णीत
ताः क्रम्य बलैर्दृढदोषामयापि पिप्पलीशब्दस्य पुल्लिंगानचिध्वनानात्। तिसृभिरिह कणाभिः संपंचभिः सप्त
भिर्वादिशाभिरथ विवृद्धं पिप्पलीवर्द्धमानमितिपाठः॥ मरुद्यरुद्यचमत्कारकारिवात्तत्पायात्॥ ॥
इदानीं हारिणां यच्छ्यामवत्सायां गृहीतो पयो गःक्रियते। तामाह॥ इत्यौषधानुचरणेन द्रुतेबलाससेजीर्ण
हरेत मरुति किंचिदुपक्रते वावातादिजिरूणपयः श्टतमुक्रमाज्यं स्यात् षट्पलं द्र पुनर्वेद्यथष ग्री०टी०
लं वा॥१॥ इत्यौषधानुचरणेन इति सर्वोक्तिप्रकारेण लंघनोल्लोदकयवागूपाचनादिनौषधानुच
रणेन बलासे श्लेष्मणि द्रुते। नीर्णाहारे। नीर्णवितंचहराणां पथ्याहृद्धिं दारद्याद्ये गतेपवति। तथा वहारि ३९
नः॥ श्यामसगज्ञात्रकरणं हृदमा कुक्षिकिसकाः। मध्यमं द्वादशाहं तु जीर्णहारमतःपरं। मरुतिवाते

किंचित्समताकउपक्रते। प्रकुपिते। श्यामवत्सायामाज्यं घृतं स्यात् भवेत्। वातादिजिरूणपयःश्ट
त। वातादीन् जयंतीति वातादिजित्॥ तेचतेगणाश्च वातादिजिद्गणाः॥ एतदुक्तंभवति। रास्नादिपिप्पल्या
दिभिः पयसा क्षीरेण श्टतं पक्वं उक्तं घृतं षट्पलं वा भवेत्। अथ षट्सु षट्पलं वा महाषट्पलं वा भवेदि
ति। तथा च चरकः॥ हराः कषायैर्वमनैर्विरेकैर्लघुभोजनैः॥ द्रव्यस्येन शाम्यंति सर्पींषि चास्मि
न्मिति॥ ॥ प्रागुक्तं षट्पलं भवेदिति। तत्प्रवृत्तंतदाह॥ विश्वाग्निचव्यमगधामगधाजटाभिराभिः प
ग्र लं मितिभिः सयवाग्रजाभिः। सर्पिः श्टतं पयसि षट्पलमेतदग्निं दीप्तोदरं हरति गुल्मिसुपथ्यमुक्तं
॥१॥ विश्वादिश्टतं। विश्वा शुंठी। अग्निश्चित्रकः। चव्यं चविका। मगधा पिप्पली। मगधाजटा पिप्पली
मूलं। आभिरमीभिः पलप्रमितिभिः पलप्रमाणाभिः। सयवाग्रजाभिः सयवक्षाराभिः षट्पलमु
क्तं सर्पिः पयसि सलिले चतुर्गुणं सर्पिः प्रमाणं श्टतं। एतत्पथ्यं उक्तं। अग्निं। केषु। अर्शःसु। दीप्तोद

रहन्ति शुण्ठि सुचेति॥ ॥सर्वं षट्पलं दश्युवेत्युक्तं इदानीं तत्र षट्पलघृतमाह॥ सूत्राकालिक पंच
कोलकचकैः॥ आजाजियुग्मोद्दिदैः सक्षारैः सविडैः समदिग्गुरुभा॥ सिंधूद्भवैः कल्कितैः॥ मुक्तेनार्द्रक
रसेन चवेनचरसैनैतत् महाषट्पलं सर्पिः पक्वमरोचकाग्निमंदत्वशीहोदरश्वासजित्॥१८॥ एतन्महा
षट्पलं सर्पिः॥ अरोचकादि जितं किं तत्॥ प्रतीकादिपकाः सतीकस्थिरबिल्वकाः॥ अग्निकाःशिरवी॥ पंचको
लं सर्वैकिं॥ कृचकः सौवर्चलं॥ आजाजी युग्मं जीरकद्वयं॥ अद्रिदं क्षार लवणं॥ क्षारो यवक्षारं॥ विडं हिंगु
द्भु सामसिंधूद्भवानि प्रसिद्धानि॥ कल्कीकृतैर्द्रव्यपिष्टैः॥ प्रतिनिः॥ मुक्तं चुक्रं॥ मुक्तार्द्रकरसाभ्यां पक्वं॥ पा
कल्पना त्रा घृतप्रस्थः कल्कस्य तुर्यांशः॥ चुक्रमार्द्रकरसा प्रत्येकं चतुर्गुणो॥ रोचकादीन् जयति॥ त्री०टी०
अग्निमंदत्वं अग्निमांद्यं॥ ननु षट्पलं कि पंचकर्माधिरे स्नेहविधेः॥ षट्पलते प्रोक्ते कस्मात् त्रयोः प्तुनरत्रा ८०
भिधानं तदुच्यते॥ पूर्वा गान्धत्वा तान्तत्रोक्ते षट्पलेऽनुपमैं वाभ्यां संस्कारः॥ इह रोके तु पलिलेन॥ स्ने

ह विधिः॥ के महाषट्पलात्तत्र अजमोदाजीरकद्वय यवक्षारलवणैं रिंगुदुक्तुषासुक्तैरधिकैः संस्का
रो॥ इह रोके महाषट्पले स्नेहविधिः॥ कषट्पलमहाषट्पलयोः र्द्वारस्क्रते रत्नावात्॥ इत्ययं विशेष इ
ति॥ ॥इदानीं पिप्पल्यादिघृतमाह॥ त्र्यूषणा तामलकी घनप्रति विषासिंदी स्थिरा यास्तिकाविश्वो
शीरकलिंग बिल्वकटुकाश्रायंतिकाचंदनैः॥ सप्राक्षामलकाम्बुभिः पिचुमितैः प्रस्थं पचेत्सर्पि
षः॥ कासश्वासमहलीमकाग्निविषमीगुल्मज्वरघ्नं नृणां॥१९॥ सर्पिः प्रस्थं पचेत्॥ त्र्यूषणा पिप्पली॥ ता
मलकी बदरवल्लिका॥ घनं मुस्तं॥ सिंहीबृहती॥ स्थिरा शालिपर्णी॥ विश्वं शुंठी॥ कलिंगाइंद्रयवाः॥ चं
३ तूलामकेर दनं रक्तचंदनं॥ अग्निस्त्रित्रकः॥ प्रतिविषादिद्रष्टा रविल्वकटुकात्रायंतिका द्राक्षामलकानिप्रसिद्धा
नि॥ एभिः पिचुमितैः कर्षप्रमाणैः सर्पिःप्रस्थं पलिलेन चतुर्गुणे पक्वं नृणां प्राणिनां कासश्वासमहली
मकाग्निविषमीगुल्मज्वरघ्नं हंतीति॥ नयावसुक्ततः॥ पिप्पल्यतिविषाद्राक्षासारिवाबिल्वचंदनैः॥ इ

त्यादि॥ इदानीं लाक्षादिकं तैलमाह॥ मूर्वादिदारुकटुकामधुकाश्वगंधारास्नाहरेणुमिशिचंदनकुष्ठनि
शाभिः। लाक्षारसेन च समेन समं मस्तु सिद्धं तैलं ज्वरापहरमेतदिति प्रसिद्धं॥२०॥ एतत्तैलं मूर्वादिभि
सिद्धं ज्वरापहरं मूर्वा चोरस्नायुः। अश्वगंधमुस्ता। दारु देवदारु। कटुका रोहिणी। मधुकं यष्टीमधु। अश्वगंधा
वाजिगंधा। रास्ना सुरभिः। हरेणुका। मिशिः शतपुष्पा। चंदनं रक्तचंदनं। कुष्ठं कुष्ठं। निशा हरिद्रा। एभि
पलिकैः स्नेहं पलशतं लाक्षारससमं मस्तु चतुर्गुणं साध्यं। अति प्रसिद्धं अतिप्रख्यातं लाक्षाद्यं
पादिकं तैलमिति॥ इदानीं सुश्रुतोक्तं षट्कंधरं तैलमाह॥ ॥मंजिष्ठा लोहितयष्टिका कुष्ठ सवि का४
श्वलाक्षा हरिद्रा समं सर्वं। स षड्गुणे दध्नि इति प्रसिद्धं षट्कंधरं तैलमिदं ज्वरघ्नं॥२१॥ इदं मंजि ।क्षी०टी०
ष्ठादिभिः पक्वं तैलं षट्कंधरं ज्वरघ्नं। सुर्जिका स्वर्जिका क्षारः। लोहितयष्टिका मंजिष्ठा। कुष्ठ ८२
कुष्ठं। विश्वं शुंठी। हरिद्रा हरिद्रा। लाक्षा प्रसिद्धा। षड्गुणे दध्नि तत्षड्गुणमथितं तिलतैलप

रकर्मईदपालिकैर्द्रव्यैः साधयेदिति प्रसिद्धं तथा च सुश्रुतः॥ लाक्षा विश्वनिशा मूर्वा मंजिष्ठा स्व
र्जिका मयैः। षड्गुणेन च तक्रेण सिद्धं तैलं ज्वरांतकृत् इति॥ ॥इति ज्वरचिकित्सा समाप्ता॥ ॥
ज्वरचिकित्सानंतरं यथोद्देशमतीसारचिकित्सामाह॥ ॥सामं कृष्णमगुरुघ्नगुडवंहणबह्निशूलमा
मातिसारमनिलप्रतिबद्धविट्कं। दोषानुरूपविहितैरितिलंघनाद्यैः पेयादिभिः क्रमवलोक्य भिषक्
चिकित्सेत्॥२२॥ आमातिसारमवलोक्य भिषक् पेयादिभिश्चिकित्सेत्। कीदृशं। सामं कृष्णमदामृजा
वर्त्तत इति सामं कृष्णं मरकं सगुरुघ्नगुडवंहणं बह्निशूलं गुरुघ्नं गुडवंचवंहणे वबह्निश्चात्तेन यातेषु
शूलं गुरुघ्नगुडवंहणबह्निशूलं। अप्र तेन वर्त्तत इति गुरुघ्नं स्त्रियाः साधनं वरांगो। गुडवं पायुः वंहणे गं
डिके। बह्निर्जठराग्निः। अनिलप्रतिबद्धविट्कं अनिलो वायुः तेन प्रतिबद्धं विबद्धं विट्पुरीषं य
स्य मनस्या। तं पेयादिभिरिति। पेया आदिर्येषां ते पेयादयः। पेयां विलेपीमनं नेह च यूष मित्या

द्यः॥ लंघनं आद्यं येषां पेयादीनां ते। पेयाद्यो लंघनाद्यास्तैर्दोषानुरूपविहितैः। दोषाः पवनाद्य
स्तदनुरूपेण विहिताः। उक्ताः। दोषानुरूपविहिताः। तैः। इति पूर्वोक्तैरेव प्रकारेण भिषकुज्ञः पि
दवितन्नमामातिसारं चिकित्सेदिति॥ ॥प्राक् पेयादिभिश्चिकित्सेदित्युक्तं। अतः पेयादीनाह॥
प्राक्पंचकोलकजलप्लुततंडुलानि। पेयानि पथ्यपृथकलघुलाजमंडैः। मृद्वोदनैर्मधुरदाडिम
यूषयुक्तैरामातिसारशमनैरुपदिष्टपथ्यैः॥१३॥ पेयादिभिश्चिकित्सेत्। प्राक् प्रथमं। पंचकोलकज
लप्लुततंडुलानि। पंचकोलकेन संस्कृतं जलं पंचकोलकजलं। तेन प्लुतास्तंडुला यासु पेयासु
तास्तथा। तानि। अथ पृथक् लघुलाजमंडैः। अथवा पृथक् वातादिप्रत्यनीकसंस्कृताये लघुला
जमंडास्तैः। मृद्वोदनैर्मधुरदाडिमयूषयुक्तैः मृद्वोदनैः। क्लिन्नसिक्थैर्भक्तैः। मधुरदाडिमेन संस्कृ
तो यूषो मधुरदाडिमयूषः। तेन युक्तानि यान्योदनानि। तैः। अन्यैरप्युपदिष्टैः पथ्यैः। आमातिसा

श्री०टी०
८२

रशमनैश्चिकित्सेदिति॥ ॥संप्रत्यनंतरं पेयादिपथ्यानंतरं आमातिसारशमनान् योगानाह॥ ध
विश्वाभयाघनवचातिविषामरदारुक्काथोऽथ विश्वजलदातिविषामृतो वा। आमातिसारशमनः
कथितः कषायः शुंठीघनप्रतिविषामृतवल्लिजो वा॥१४॥ विश्वादिभिः। उक्तः क्वाथः। आमातिसा
रशमनः कथितः। विश्वं शुंठी। अभया हरीतकी। घनं मुस्तं। वचातिविषे प्रसिद्धे। अमराकं देवदा
रु तैः क्वाथः। एष योगो लोके देवदार्वष्टक इति प्रसिद्धः। अथेति द्वितीयं योगमाह। विश्वजलदा
तिविषामृतैः क्वाथः। जलदं मुस्तं। एष त्रिकार्षिक इति प्रसिद्धः। तृतीयं योगमाह। शुंठीघनप्रति
विषामृतवल्लिजो वा। कषायः आमातिसारशमनः। अमृतवल्लि गुडूची। एष चातुर्भद्रक इति
प्रसिद्धः। इदानीं बिल्वादिकं मुस्तकेनोक्तं योगमाह। ॥ततः कलिंगातिविषाद्रबिल्वैः सबालकैः कु
क्वथितः कषायः। नस्यैसम्प्लायसशोणितायसामायशाम्योःपकलिंगपद्धु॥१५॥ ततोऽनंतरंक

लिंगादिकषायस्तस्मैसामायशस्त्रः। कलिंगइंद्रयवः। अहंमुस्तं। उक्तंयितंःकषायःकल्पनया॥ स
शूलायशूलसंयुक्तायसशोणितायशोणितसहिताय। तस्मैआतुराय। सामायआमसहितायश
स्तं। प्रशस्तं। अथवाकलिंगषट्कं। शस्तं। अस्यामेवावस्थायामिति। एवंकलिंगषट्कं। शस्तंइत्यर्थः।
सांप्रतंतदाह॥ ॥कलिंगयवषट्कमाह॥ सहरीतकीप्रतिविषाकुचकंसवचंसहिंगुसकलिंग
यवंशतितकलिंगयवषट्कमिदंरुधिरातिसारगदंसशूलहरं। इत्येतत्सर्वोक्तेनप्रकारेण। ह
रीतकीचप्रतिविषाचकुचकंचतानितथातैः। सहवर्त्ततइति। सहरीतकीप्रतिविषाकुचकं। कुचकं
सौवर्चलं। सहवचयावर्त्ततइतिसवचं। सहहिंगुनावर्त्ततइतिसहिंगु। सहकलिंगयवैर्वर्त्तत
इतिसकलिंगयवं। कलिंगयवाइंद्रयवाः। कलिंगाकटुकमितिसर्वाचार्यसंज्ञेयं। रुधिरप्रधानो
तिसारोरुधिरातिसारः। तदाख्योगदोरुधिरातिसारगदः। सचशूलंचरुधिरातिसारगदशूले।

एतेहरतीतिरुधिरातिसारगदशूलहरमिति॥ इदानीं आमातिसारप्रत्यनीकद्रव्यसंस्कृतांहरीत
कीमाह॥ छिन्नामबिल्वयवगोक्षुरकैरुबूककठिनोद्भवाउषजलैर्मधुनावलीढा। बद्धास्यविट्कमतिशू
लमसृग्विमिश्रमामातिसारमपहंतिहरीतकीयं।२७। इयंहरीतकीआमातिसारंअपहंति। कीदृशी
छिन्नाकैः। आमबिल्वयवगोक्षुरकोरुबूककठिनोद्भवाउषजलैः। आमबिल्वंचयवाश्चगोक्षुरकश्चउ
रुबूककठिनोद्भवाचउषजलंचतानितथातैः। आमंबिल्वमपक्वबिल्वं। यवगोक्षुरकौप्रसिद्धौ॥ उ
रुबूकःएरंडः। कठिनोद्भवागुडूची। उषजलंकांजिकं। कल्पनाचआमबिल्वादीनांपलं। इयंहरीतकी
द्वयंकांजिकषोडशपलैः। छिन्नंपिष्टंमधुनावलीढमामातिसारमपहंतीति। बद्धंविबद्धंअस्यावि
ट्यस्मिन्नसतथाभूतं। अतिशायेनशूलंयस्मिन्नसतथाभूतं। असृक्रक्तं। तेनविमिश्रं। आमाति
सारमपहंतीति॥ ॥सांप्रतंरक्तातिसारहरंनागरादिकंयोगमाह॥ ॥ सनागरैःसातिविषाप

वष्टकादिमगधक्षौद्रमधुमिश्रितः। कौटजवल्कलेह। कौटजवल्कं कुटजत्वक् स्वरसं मानबलेनोप
युक्तः पक्वातिसारं निहंतीति। इदानीमवेदनस्यातिपक्वस्य दीप्ताग्नेर्विरूढितस्य नानावर्ण
स्यातिसारस्य पुटपाकमाह। श्रीपर्णिपर्णावृत्तदीर्घवृंतजवक्वपिंडका तंडुलवारिकल्कि
७१४ ताक्तात्। मृदावेष्टितादग्निविपाचिताद्रसं पिबेदतीसारहरं समाक्षिकं। ३। श्रीपर्णिपर्णावृत्तदीर्घवृं
तजवक्वपिंडकादग्निविपाचितात् रसं समाक्षिकं पिबेत्। अतीसारहरं। श्रीपर्णी काश्मरी त
स्याः पर्णानि। तैरावृतं वेष्टितं। दीर्घवृंतमरलुकः। तस्माज्जातः दीर्घवृंतजः। सचासौ वक्वपिंड
कश्च। दीर्घवृंतजवक्वपिंडकाः। श्रीपर्णिपर्णावृतश्चासौ दीर्घवृंतजवक्वपिंडकश्च श्रीपर्णिपर्णा श्री०८१०
वृत्तदीर्घवृंतजवक्वपिंडकः। तस्माद्रसं पिबेत्। किंविशिष्टात् तंडुलवारिकल्किताक्तात्। तंडुलधा ८५
वनेपिष्टात्। मृदावेष्टितात्। मृदा लिप्तात्। वा पुनः। अग्निविपाचितात्। इत्यत्राग्निग्रहणं कालादि

पाकनिवृत्त्यर्थं। इष्टं रूक्षात् वक्वपिंडकात् योरसस्तं सुशीतं समाक्षिकं मधुयुक्तं पिबेत्। अ
तीसारहरमिति। तथा च सुश्रुताचार्यः। अवेदनं सुसंपक्वं दीप्ताग्नेः सुचिरोत्थितं। नानावर्ण
मतीसारं पुटपाकैरुपाचरेत्। वक्वपिंडकं दीर्घवृंतस्येत्यादि। ॥ द्वितीयं पुटपाकयोगमाह। श
ल्लकत्वक् याकल्पनया वटादिनाकल्कीकृतेनोदरगेण तित्तिरेः। प्रकल्पितः स्यात्पुटपाकतो रसः। स
शर्करः क्षौद्रयुतोऽतिसारजित्। ४। तित्तिरेः उदरगेण वटादिन्यग्रोधोदुंबराश्वत्थप्लक्षादिना कल्की
कृतेन शल्लककत्वक्याकल्पनया अनेन रोक्रया। तित्तिरिर्जुविततनिरुद्धां तच्छिरीषतुंडसुरक्ताश्योदरं
न्यग्रोधादिकल्केन संपूर्य काश्मरीपरिवेष्टितं मृदावलिप्य खदिरांगारैः उत्स्वेदयेत्। तस्मात्त
ति तान् रसः पुटपाकजः पुटपाकजातः शीतः सशर्करायुक्तः क्षौद्रयुतश्च। क्षौद्रं मधु तेन युक्तो
॥ अतीसारजिद्भवतीति॥ इत्यतीसारचिकित्सा समाप्ता॥ ॥ अतीसारचिकित्सानंतरं यथोद्दे

नं ग्रहणीचिकित्सामाह ॥ ॥ विश्वादिभिः मरुति पाचनमत्र शस्तं मुस्तादिभिर्भवति संग्रहणं त
तश्च । स्याद्दीपनं तदनु च ग्रहणीविकारे कल्याणकादिभिरिति ग्रहणीचिकित्सा ॥ २४ ॥ अथ ग्रहणीरोगे
मरुति मरुच्छूले विश्वादिभिः पाचनमादौ शस्तं । विश्वादयो विश्वाभयाघनवचातिविषेत्येवमादयः तिमा
रोक्ताः । ततश्च पाचनानंतरं मुस्तादिभिः संग्रहणं भवति मुस्तादयो मुस्तमोचरसलोध्रधातकीत्या
दयः । तदनु संग्रहणानंतरं ग्रहणीविकारे कल्याणकादिभिर्दीपनं स्यात् तत्र चेत् । कल्याणकादयः ॥
कल्याणगुडतक्रारिष्टतक्रगुडपिप्पल्यादिगण— गुटिकाचित्रकगुटिकेत्येवमादयः । इति शास्त्र त्रि॰ टी॰
परिभाषा ॥ एतां ग्रहणीचिकित्सां । तथा च सुश्रुताचार्यः । ततः पाचनसंग्राहिदीपनीयं गणेन त्र ८६
यं पिबेत्स्नातः सुरारिष्टसन्नेह मूत्र तु षां बुभिरिति ॥ इदानीं भूनिंबाद्यं चूर्णमाह । भूनिंबकौटजकटु
त्रिकमुस्तकलिङ्गाः कर्षांशकाः सशिखिमूलपिचुद्वयाः स्युः । चक्रकौटजीपलचतुष्कसिता गुडांबुपी

तं तृणं मिह हरेद्ग्रहणीविकारान् ॥ २५ ॥ इदं भूनिंबादीनां चूर्णं गुडांबुनः पीतं तृणं । ग्रहणीविकारं हंति
भूनिंबकौटजकटुत्रिकमुस्तनिक्ताः कर्षांशकाः कर्षोंऽशो येषां भूनिंबादीनां ते कर्षांशकाः । प्रत्येकं क
र्षमानाः । भूनिंबः किराततिक्तकं । कौटजा इंद्रयवाः । कटुत्रिकं शुंठीमरिचपिप्पल्यः । मुस्तं प्रसि
तिक्ता कटुका । सशिखिमूलपिचुद्वयाः । शिखी चित्रकः तस्य मूलं शिखिमूलं तस्य पिचुद्वयं कर्ष
द्वयं शिखिमूलपिचुद्वयं सह तेन वर्तंते ये ते तथा । स्युर्भवेयुः । चक्रकौटजीपलचतुष्कमिता । कुट
जस्येयं कौटजी त्वक् । पलचतुष्कमिता चतुःपलप्रमाणेत्यर्थः । एषां चूर्णं कर्षं गुडकर्षसंयुक्तं शीत
शीतांबुपलेन युक्तं नीः पीतं तृणं प्राणिनां । इदं ग्रहणीविकारान् हरेदिति ॥ सांप्रतं त्र्यंषिकाद्यं चूर्ण
माह । मत्र्यंषिकं त्रिकटुकं लवणत्रयं च क्षारद्वयं सचविकं च   स चित्रकं च । माजाजिसितोद
मिशिहिंगु विधाय चूर्णं तद्वीजपूरकरसकृतमेतदेयं ॥ ३४ ॥ अनेन कोष्णसलिलेन तु षां बुना

वा पीतं कुलत्थयवकोलजलेन वापि ॥ मंदानलेषु नृषु दीप्तिकरं ग्रहण्यामर्शस्सु गुल्मिषु च नेष
तमेतदेव ॥३८॥ एतदेषां ग्रंथिकादीनां चूर्णं तक्रादिभिः पीतं नृषु मंदाग्निषु दीप्तिकरं ग्रहण्या
दिषु चैतदेव चेष्टं नवनि ॥ सग्रंथिकं सपिप्पलीमूलं ॥ त्रिकटुकं सर्वौकं ॥ ल[illegible]वणत्रयं ॥ बिडसौव
र्चलसैंधवानि ॥ क्षारद्वयं यवक्षारस्वर्जिकाक्षारौ ॥ सचविकं सचव्यं च सचित्रकं सह चित्रकेण ॥ साज
जिमोदमिशिहिंगु ॥ अजाजी जीरकं ॥ अजमोदं अजमोदा ॥ मिशिः शतपुष्पा ॥ हिंगु रामठं ॥ विक्षय
त्वचा चूर्णितबीजपूरकरसेन भावितं ॥ एषां ग्रंथिकादीनां द्रव्याणां चूर्णं गोमथितेन कोष्णसलि
लेनोष्णोदकेन ॥ तुषांबुना कांजिकेन ॥ कुलत्थयवकोलजलेन चैषां क्वथितेन पीतं नृषु प्राणिषु चो० टी०
मंदानलेषु मंदाग्निषु दीप्तिकरमग्नेः ॥ ग्रहण्यां ग्रहणीविकारे ॥ अर्शःसु गुल्मिषु चैतदेव चेष्टं ॥ न ८७
वतीत्येवकारेणैकांतप्रशस्तनीकृतत्वाप्यनइति ॥ इदानीं चांगेरीघृतमाह ॥ ॥ शुंठीत्रिकंटमगध

गजपिप्पलीभिः पाठाग्निबिल्वगिरधान्ययवानिकाभिः ॥ सग्रंथिकाभिरिति दध्नि घृतं विपक्वं चां
गेरिकारससमं ग्रहणीघ्नमेतत् ॥३९॥ एतत् घृतं शुंठ्यादिविपक्वं ग्रहणीघ्नं चेतत् ॥ शुंठी विश्वा ॥ त्रिकं
टकं गोक्षुरकं ॥ मगधा पिप्पली ॥ गजपिप्पली हस्तिपिप्पली ॥ अग्निश्चित्रकः ॥ ग्रंथिकं पिप्पलीमूलं ॥ पा
ठा बिल्वगिरधान्ययवानिकाः प्रसिद्धाः ॥ आभिरर्द्धपलिकाभिः घृतप्रस्थं दधिचतुर्गुणं चांगेरिकार
ससममित्यनया कल्पनया विपक्वं ग्रहणीं हंतीति ग्रहणीघ्नमिति ॥ सांप्रतं कल्याणकं गुडमाह ॥ वा
पाठाधान्ययवान्यजाजिहपुषावह्नित्रिसिंधूद्भवैः सत्रेयस्यमोदकीटरिपुभिः स्याज्जटासंयुतैः
॥ सव्योषैः सफलत्रिकैः सत्रुटिभिस्त्वक्पत्रकेशरैधै रित्युत्पमितैः सतैलकुडवैः साष्टहृच्छुष्टि
भिः ॥४०॥ एतेरामलकीरसस्य तुलया सार्द्धं तुलार्द्धं गुडात्पक्वं भक्षिपजावलेहवदयं प्राकृतोजना
द्युत्पते ॥ ये केचिद्ग्रहणीगदाः सगुदजाः कासाः सशोषामयाः सश्वासः सक्षयपुत्सवोदररुजः कल्या

णकल्याणकंजयेत्॥४५॥एतैःपाठादिभिरौषधैः॥आमलकीरसस्यचतुर्तुलयासार्द्धंसहत्रिवृजादैवेन
गुडतुलार्द्धंपक्वंत्रिवृज्जार्द्धंपंचाशत्पलानि।पाठादीनिप्रमिश्रानि।किंविशिष्टैःपाठादिभिः।मश्वेयस्य
जमोदकीटरिपुभिः।जम्बाजटासंयुतैःश्वाश्वयमीहस्तिपिप्पली।अजमोदःखरगन्धाकीटरिपुर्वि
डंगं।जम्बाजटापिप्पलीमूलं।मयोषैःसकटुत्रिकैः।सत्रिफलयासदा।सत्रुटित्वक्पत्रकेरौषधैः।त्रु
टिःएला।त्वक्वरांगं।पत्रकंछदं॥एभिरत्नप्रमितैः॥कर्षप्रमाणैः॥द्वितैलकुडवैः।तिलतैलपलाष्टक
समेतैः।साष्टत्रिंशतामुष्टयः।मुष्टिःपलं।अष्टौचतेत्रिंशन्मुष्टयश्च।अष्टत्रिंशन्मुष्टयः।सद्भानिर्वर्त्ति
तेयानि।पाठादीनितानिवृतयानैः।आमलकीरसस्यसंनिभिकृतपपदेयेरसशाद्यैः।तेनक्वाथेपिव सो॰टी॰
र्त्तैः।मांसरसेनेतियथा।तस्मात्स्वरसक्वाथयोर्यथासंभवेनपक्वं।कथमवलेह्वत्।अवले ८८
॥कुडावलेहानंतरं चित्रकहरीतकीमाह॥ ॥वच्चार्यं त्रशतानि चित्रकजटामुखं च सल्लाभृत्ता
ध्ववीणामुदकार्मणे क्विनिरपात्रोणेन च काथयेत्। पादस्थे कथनेगुडस्य च शतं पथ्या दकेनापि
तं पक्वं शृतशीतले च मधुनः प्रस्थार्द्धमात्रं क्षिपेत्॥२३२॥ व्योषस्यात्रिसुगंधिकस्य च पलान्यत्रैव
षट्प्रक्षिपेत्क्षारस्याईपलं रसायनमिदं संसेव्यते सर्वदा॥ शोषश्वाससबलासकासवमथुश्लेष्मा
प्रतिश्यायिभिः क्षीणोरःक्षतहिक्किभिः कफशिरोरुग्भिः प्रनष्टाग्निभिः॥ चित्रकवार्यत्र शतानि चि

त्रकजटायुक्तं वफला घृतार्धमत्रीणां सुद्धकामणि श्विनिरपां द्रोणे न च क्वाथयेत्॥ चित्रकजटामता
क्षत्रीणां त्रीणि शतानि। युक्तं च मूलं तस्य चतुर्थं शतं। एवं चत्वारि शतानि क्वाथयेत्। क्वाथं कु
र्यात् चित्रकदशमूलगुडूच्यामलकानां प्रतिशतं। जलचतुर्द्रोणे क्वाथ्यं च नवकषायेन पादस्थ चतुर्ना
गस्य गुडस्य च शतं। पथ्या चूर्णादिकेनान्वितं संयुक्तं पक्वमवलेहपाकेन। शीतशीतले च तस्मि
न् लेहे मधुनः प्रस्थार्द्धमात्रं षोडशपलप्रमाणं मष्टपलं। व्योषस्य त्रिकटोरत्र षट्पलानि। त्रिसु
गन्धिकस्य त्वगेलापत्रकाणां च षट्पलानि। क्षारस्य यवक्षारस्यार्द्धपलं प्रक्षिपेदिति सर्वत्र सं
बन्धः। इदं रसायनं सर्वदा सर्वकालं संसेव्यते सम्यक् उपयुज्यमानोऽयं शोफस्यापबलासकासम
मयुक्तश्लेष्मप्रतिश्यायविनिः बलासकासमति नश्लेष्मकासे। किं तर्हि श्लेष्मणि कासे चापि श्लेष्मप्रति
श्यायविनिः। कफशिरोरुग्नि॥ अतिशायेनेति॥ ७॥ चित्रकहरीतक्यनन्तरं व्याघ्रीघृतमाह॥

क्वाथस्य कंसमनुपकल्प्य रसस्य वापि व्याघ्रीलतामूलतादिति योद्भवस्य। तन्मूलतः पलचतुष्टयम
त्र कल्कः सर्पिःपलानि दशषोडशषट्समिदं॥ ८॥ व्याघ्रीघृतं मधुयुतं विधिवत्प्रयुक्तमेतत्त्रिदंतिकफ
कासमपीनसं च। नाशीहर्विर्हरति सर्वदेवपक्कं श्वासं हषस्य च हृतं स्वरसादपि तौ॥ ३५॥ क्वाथ
स्य कंसं पात्रं प्रकल्प्य रसस्य वा। कीदृग्गुणस्य वा व्याघ्रीलतामूलतादिति योद्भवस्य। व्याघ्रील
तावज्जमूलतात् तयोर्द्विनयं। तस्मादुद्भवोयस्य क्वाथस्य रसस्य वा। सतथा। तस्या तन्मूल
तः। तयोर्मूलं तन्मूलं। तस्मात् तादिति व्याघ्रीलतामूलतयोः परामर्शः। पलचतुष्टयं एतत्कल्कं भवति।
व्याघ्रीलतामूलात् द्वेपले गुडूचीमूलात् द्वेपले वा। अत्र घृते कल्कः कर्षमात्रं मध्ये विषमपलानि दश
षट् समाधानि। एकत्र संख्यया एकं प्रस्थं द्वात्रिंशत्पलानि। ननु प्रस्थमेव नोक्तस्मात्कं॥ किमर्थं व्या। स्तार
मुच्यते। अत्रोच्यते संख्यानानात्वेन तत्स्थापनार्थं प्रस्थमर्द्धप्रस्थं पादं वा साध्यमिति। शतैरे

सिद्धं व्याघ्रीघृतं ॥ मधुनः पादेन युक्तं ॥ विधिवत् विधिना प्रयुक्तं कफकासपीनसज्वरं हंति ॥ नागो हवि:
ष्ट्व विदेव पक्कं क्वाथेन रसेन वा तन्मूलकल्केन वा श्वासं निहंति ॥ वृषस्य वासकस्य वा घृतं पूर्ववत् प
क्कं श्वासमुपहंति ॥ अस्रपित्तं रक्तपित्तं ॥ वृषस्य घृतं सहसा शीघ्रं हंतीत्यनेनातिशयेन विकारे प्रत्य
नीकं तां महती वासकस्य प्रकाशयतीति ॥ ॥इति श्वासकासचिकित्सामाला॥ ॥श्वासकास
चिकित्सानंतरं यथोद्देशं रक्तपित्तचिकित्सितमाह ॥ ३ ॥ कल्केन यष्टीमधुकस्य सपिविदारिकं
दंद्रवदुग्धसिद्धं सशर्करं नागबलाविदारीशतावरीनिश्च द्वय विपक्कं ॥ २१ ॥ द्रवविदारीक्षुश
तावरीणां रसैः इक्षोरीत्यत्र शर्करानिः सृष्टीकया राजकसेरुकैर्वा विपक्कमाज्यं पयसाम्रपित्ते ॥ ३ श्री०टी०
अस्रपित्ते रक्तपित्ते ॥ मर्पियष्टीमधुकस्य कल्केन विदारिकं दद्रवदुग्धसिद्धं हितं घृतस्य द्वावित्रंशा(११९
स्तानि ॥ यष्टीमधुकपलचतुष्टयेन विदारिकं दद्रवदुग्धस्यांचतुर्गुणत्वं साध्यतो मशर्करं शर्करा

कल्केन वा पक्कं नागबलाविदारीशतावरीभिः पृथक्कथिताभिः पृथक्कृतानि त्रीणि तदाख्यानि ॥
रक्तपित्तहराणि ॥ द्रवादिरसैर्वा चतुर्भिरिक्षोरीत्यत्र शर्कराभिः कल्कीकृताभिः पक्कं घृतमस्रक्पि
त्ते ॥ मृद्वीकया कल्कीकृतया राजकसेरुकैर्वा कल्कीकृतैर्विपक्कमाज्यं घृतं पयसा दुग्धेन चतुर्गुणे
नास्रक्पित्ते हितमिति ॥ ॥सांप्रतं वासादिकं योगमब्रवीत् ॥ ॥नीलोत्पलांबुरुहकेसरमृत्प्रियं
गुरोध्रांजनानि मधुना मितया युतानि ॥ पीतानि वासककषायपरिप्लुतानि घ्नंति प्रवृद्धमतिशोणि
तपित्तरोगं ॥ ३८ ॥ नीलोत्पलादीनि पीतानि शोणितपित्तरोगं घ्नंति ॥ नीलोत्पलं सुगंधिकं अंबुरुहके
सरं पद्मकेसरं ॥ मृत् कवीमपर्पटिका ॥ प्रियंगुः फलिनी ॥ रोध्रं शावरपोद्घः ॥ अंजनं रसांजनं ॥ नीलो
त्पलादीनां चूर्णं वासककषायपरिप्लुतं शर्करामधुसंयुक्तं पीतं ॥ अतिप्रवृद्धं शोणितपित्तं र
क्तपित्तमपहंतीति वाक्यार्थः ॥ ३ ॥ अधुना खंडकूष्मांडमवोचत ॥ कूष्मांडकात्पलशतं सुतुडं॥

वैश्वानुर्निर्दिष्टं घृताद्‌नुपचेत्समखंडमेतत्‌।विश्वाकृष्णाजीरककणाप्रक्षेपकयुक्तं त्वग्नागपुष्पत्रु
टिपत्रपलद्वयेन॥१४९॥ एतत्पुराणमधुन:कुडवद्वयेन संयोजितं जयति निर्जितुपुरक्तपित्तं।ऊ
र्ध्वप्रवृत्तमपि गुदप्रगुदप्रवृत्तमस्मात्परं नु विजवेदपरं न दृष्टं॥१५०॥ स्त्रत्रं मक्तक्षमकविचवमि
मत्त्वरूप्तमम्भिपस्मृति मुरांक्षतमूर्ध्ववातं।उन्मादमप्यपहरेदिति दृष्टमन्यो रक्तान्मकं च शा
मयेद्दिद्धंति बुद्धिः॥१५१॥ कूष्माण्डकात्स्विन्ननि:कुलीकृतात्तु पलशतं।घृतकुडवैश्वानुर्नि
र्दिष्टात्पले त्वर्धं तु लितं मधुनि निमग्नमखंडमस्य पलशतेन युक्तं त्वनुपश्चात्‌ विपचेत्‌।विश्वा
दीनां चूर्णं पलषट्कं युक्तं।विश्वाकृष्णा ठीजीरकमजाजी।कणापिप्पली।तावत्पचेत्‌।यावद् श्री०टी०
वलेहानुका।शिशीतं त्वगादीनां पलद्वयेन युक्तं।त्वग्वरांगं।नागेपुष्पं नागकेसरं।त्रुटि:एला।पत्रं १२०
तमालपत्रकं।एतत्खंडकूष्मांडं।पुराणमधुन:कुडवद्वयेन द्रवद्रव्यचात्‌।षोडशाष्टनि

पलै:संयोजितं॥जंतुपुष्पाणि तु रक्तपित्तं जयति।ऊर्ध्वप्रवृत्तमाप्यघ्राणप्रवृत्तं।गुदप्रगुदप्रवृत्तमप
यो नु विरुद्धमस्मात्परमन्यन्नवेत्‌।स्वरत्तक्षत्रादीनपहरेत्‌।अतिदृष्यं स्तुकं जननं।अशीशमयेत्‌।र
क्तान्मकं रक्तपित्तमेनवं।बुधिक्षतं विरद्धातिक गेतीति॥खंडकूष्मांडकानंतरं एलादिकां गुटि
कामाह॥ ॥एलावरांगमनापिपत्रकमेतद्धकर्षांशकं मगधजार्द्धपलं त्वक ल्यां।मृद्वीकयावमित
यामधुकेन युक्तं खर्जूरकेणव पलप्रमितैस्तु तुर्निः॥१५२॥ एलादिकामधुयुता गुटिकाति द्रुघा
ध्यारंघं प्रशमयेदति रक्तपित्तं।वक्त:क्षते च पठितां शि:सिरजं कठोवम्रलठीमुच्चत्वापि सुशक्ततमा
नरा स्त्रेलां॥१५३॥ एलाचवरांगं चवरांगं त्वक्पत्रकं चा एतत्त्रितयमर्ध कर्षांशकं।मगधमं भार्द्धप धजा
लं।पिप्पलीअर्द्धपलं।कल्त्यं कल्पनीयं।मृद्वीकया द्राक्षयामितया सैयष्टीमधुकेन युक्तं खर्जु गु
केन।खर्जूरकेण च पलप्रमितैस्तु तुर्निः मृद्वीकादिनि:प्रयुक्ता एलादीकामधुसाहिकाऽतिद्र
गु

घा॥ अतिशायेन रूक्षयाय हिता॥ अतिरूक्षा॥ तृष्णाश्रुकृतननी॥ द्रवं प्रशमयेत्॥ रक्तपित्तम् अपि च
प्रशमयेत्॥ वरूः स्तुता॥ हिशुवनृणां प्राणिनां प्रशस्ततमा॥ अतिशायेन हिता॥ पठिता पूर्वाचार्यैरि
ति॥ ॥इति रक्तपित्तचिकित्सा समाप्ता॥ ॥रक्तपित्तचिकित्सानंतरं यथोद्देशं तृष्णाचिकित्सितमा
ह॥ ॥लाजा अबीजं जनमुत्पलानि न्यग्रोधरोहः मबिशाः मकुष्ठः। क्षौद्रेण युक्तो वटकोऽरुतश्च तृष्णा
विघातायसुखेन धार्यः॥२४॥ खंड लाजादीनि मधुना वटकं कृत्वा॥ मवटकः तृष्णाविघातार्थं सुखेन
धार्यो धारणीयः॥ लाजा व्रीहिधान्यविशेषाः॥ अबीजं पद्मबीजं॥ अंजनं रसांजनं॥ उत्पलं नीलोत्पलं श्री॰टी॰
॥न्यग्रोधरोहो वटप्ररोहः॥ मबिशाः खंडो मकुष्ठं ः कुष्ठमरिचं॥ क्षौद्रेण मधुना युक्तः संयुक्तः॥ अव
टको वटकी क्रियते स्म वटकीकृत इति॥ ॥ ॥ वटकानंतरं तृष्णाघ्नं काथमाह॥ ॥लाजा अला १२१
मक मृणालिका निंबं गोटनीला अकसेरुक्ताभिः॥ शृतं पयः पीतमनुमं मेतत्तृष्णां हरेत्सौ

डमिता समेतं॥ ४५॥ लाजादिभिः पयः सलिलं शृतं कथितमनुष्णं शीतं। क्षौद्रसितेन मधुशर्करेताभ्यां स
मेतं संयुक्तं पीतं तृष्णां हरेदिति॥ अंबु पद्मं लामज्जकमुशीरं नेद्रां नीला अस्रं नीलोत्पलं॥ कसेरुकं राजकसेरु
कं॥ एभिरिति॥ इति तृष्णाचिकित्सा समाप्ता॥ ॥तृष्णाचिकित्सानंतरं यथोद्देशं छर्दिचिकित्सितमाह॥ ॥
पथ्याक्षधात्रीमगधोषणानां चूर्णं सलाजांजनकोलमध्यं। छर्दिं निहन्त्याशु समाक्षिकं तु सत्र्यूषणं वा
धकपित्थमध्यं॥ ४६॥ पथ्यादीनां चूर्णं समाक्षिकं मधुसंयुक्तं आशु शीघ्रं छर्दिं निहन्ति। छर्दयति॥ प
थ्या हरीतकी॥ अक्षो बिभीतकः॥ धात्री आमलकं॥ मगधा पिप्पली॥ ऊषणं मरिचं॥ एषां चूर्णं॥ लाजा
श्च अंजनं च कोलमध्यं च तानि तथा॥ एभिः सहवर्त्तत इति सलाजांजनकोलमध्यं चूर्णं॥ अंजनं र
सांजनं॥ कोलमध्यं बदरमध्यं॥ द्वितीयं योगमाह॥ कपित्थमध्यं कपित्थगिरं सत्र्यूषणं सत्रिकटुकं अ॰२
मधुना सह छर्दिं निहन्ति॥ इति छर्दिचिकित्सा समाप्ता॥ ॥छर्दिचिकित्सानंतरं यथोद्देशं हिक्काचिकि

ञ्जितमाह ॥ ७ ॥ वमंतहृती कुसुमं फलं च सगैरिका तिक्तकरोहिणी च । योमद्यपःक्षौद्रसमन्वितं च हि-
क्कारं स चाद्भुतनाशनं च ॥ ७ ॥ वमंतहृती पाटला । तस्याः कुसुमफलं च क्षौद्रसमन्वितमित्येको योगः ।
तिक्तकरोहिणी कटुका । सगैरिका गैरिकेण सह । क्षौद्रसमन्विता । इति द्वितीयो योगः । योगद्वयमे-
वलेह्यं समधु हिक्काहरं हिक्कां हरतीति । अद्भुतनाशनं च । मनःसाध्वसनाशकारि वचनं । हिक्का-
हरमिति ॥ इति हिक्काचिकित्सा समाप्ता ॥ ॥ अथ हिक्काचिकित्सानंतरं यथोद्देशं शूलचिकित्सितं
ब्रूते ॥ बिल्वौषधेन रुचकेन सदाडिमेन तस्यादम्लवेतसयुतं कृतहिंगुभागं । तद्धिंगुपंचकमिदं हृदया-
मयघ्नं नेत्राग्निधामनमुनिना गदितं मुनीनां ॥ ७ ॥ इदं तत् हिंगुपंचकं यत् नेत्राग्निधाम्नेन मुनिना ची० टी०
मुनीनां अन्येषां मुनीनां गदितं कथितं । हृदयामयघ्नं । हृदये आमया रोगाः शूलादयो हृदयाम- १२२
याः । तान् हंतीति हृदयामयघ्नं । बिल्वौषधेन शुंठ्या । रुचकेन सौवर्चलेन । सदाडिमेन रुचकेन स्यात्

म्लवेतः । अम्लवेतसयुतं योजितं । कृतहिंगुभागं कृतः संपादितो हिंगुभागो यस्मिन् तत्तथा । इदं त-
त् हिंगुपंचकं चूर्णमिति ॥ ॥ हिंगुपंचकानंतरं हिंग्वष्टकमाचष्टे ॥ ७ ॥ व्योषाजमोदयुतजीरकयुग्म-
सिंधुचूर्णं सरामठविभागमिति प्रयुक्तं । हिंग्वष्टकं हरति रुक्जठरांतरालशूलानि गुल्मगुदजग्रहणी-
विकारान् ॥ ७ ॥ व्योषादिचूर्णं हिंग्वष्टकं । व्योषं च अजमोदेन युतं । यज्जीरकयुग्मं । तत्र सिंधुश्च । एषां
चूर्णं । व्योषं त्रिकटुकं । अजमोदा प्रसिद्धा । जीरकयुग्मं जीरकद्वयं । सिंधुः सैंधवं । सह रामठविभागे-
न यत् वर्त्तत इति । तत् चूर्णं तथा । रामठं हिंगु । इत्यनेन क्रमेण प्रयुक्तमुपयुक्तं । हिंग्वष्टकं हिंगुसहि-
तमष्टकं । हरति रुक्जठरांतरालशूलानि । रुक्च उरं रुक्जठरे । तयोरंतरालं कोष्ठं । तस्मिन् शूलानि
। गुल्मादींश्च हरतीति ॥ ७ ॥ अधुना विश्वाद्यं चूर्णमाह ॥ ॥ सविश्वसौवर्चलहिंगुचूर्णमुष्णांबुना द्विः
परिपीतमेतत् । हृत्पृष्ठकोष्ठांतरबद्धमूलं तं । शूलं जयत्याशु मरुत्कफोत्थं [illegible] । एतत् विश्वादिकं

चूर्णं परिपीतं रुदादिशूलं जयति। विश्वं च सौवर्चलं च विश्वसौवर्चले ताभ्यां सह विश्वसौवर्चलाभ्यां
वर्त्तन्त इति सविश्वसौवर्चलं। नष्टत नहिंगु वा सविश्वसौवर्चलं हिंगु। तस्य चूर्णं। कालिः परिपीतं उ
ष्णाम्बुरङ्गिः उष्णोदकैः पीतं। मरुत्कफोद्भवान् श्लेष्मजं शूलं जयति। नाड्यादीनि॥ ७॥ अतोऽनंत
रं तुंबुर्वादि चूर्णमाह॥ ॥चूर्णं तदेन इति। तुंबुरु तुरुष्क राकपथ्या एतेन समविडं रुचकं सहिंगु सिं
धूत्थ वन सहितं यववारि पीतं शूलापतं त्रक विकार ररं यकृत्। ॥ तदेतन्न चूर्णं तुंबुर्वादि इति। तुं
बुर्वादीनां समादार द्वंद्वः। रुचकं सौवर्चलं। सहिंगु हिंगुना सह। एतत्सर्वं चूर्णीकृतमित्यर्थः। सिंधू
त्थं सैंधवं। तेन सहितं। सन्मिश्रं। यवैः संस्कृतं वारि यववारि। यवक्वाथेन पीतं। शूलापतंत्रं कवि शी०टी०
कार ररं यकृत्। सर्वचार्यैस्तदेतद् इति॥ ॥अधुनादाधिकं घृतमाह॥ रुक् यावशूक बिडदाडिम १२३
तिंतिडीकसिंधूत्थ हिंगुरुचकजीरकैः। सग्रंथिकैः सचविकारुचक जमोदेर्व्योषा।

ज्ञावेतस्य युक्ते रितिकल्कपिष्टैः। प्रशान्तबीजपूरकरसेन चतुर्गुणेन दध्ना च दाधिकमिति प्रवदं
ति वैद्याः। हृन्नष्टकोष्टगुदवंक्षणबस्तिशूलमर्शांसि गुल्मम पहंति विशेषतश्च॥ ५४॥ एतत् घृतं
दध्ना संस्कृतं दाधिकमिति प्रवदंति वैद्याः। एतत् रुगादिभिः कल्कपिष्टैः साध्यते। रुगादीनामितरेत
रद्वंद्वः। रुक् कुष्टं। यावशूको यवक्षारः। तिंतिडीकं वृक्षाम्लं। सिंधूत्थं सैंधवं। रुचकं बिडकं। सितजल्ल
जीरके ग्रसिद्धेति। सग्रंथिकैः। सपिप्पलीमूलैः। सचविकादिभिः। चविका चव्या। रुचकं सौवर्चलं
व्योषाम्लवेतसाभ्यां युक्तैः संयुक्तै रुगादिभिः। व्योषं त्रिकटु। शेषाणि प्रसिद्धानि। इत्येभिर्द्रव्यैः कार्षि
कैः कल्कपिष्टैः बीजपूरकरसेन दध्ना च चतुर्गुणेन घृतात् चत्वारि शत्पलानि साध्यानि। तद्दाधिकं
घृतं हृदादिशूलान्यर्शांसि चोपहरति। गुल्मं च विशेषादिति॥ ७॥ अधुना समशर्करं चूर्णमाह॥
॥ ॥ स्मरदयं त्रिकटुकं त्रिफलां हरिद्रायुक्तदारुमुस्त लवणत्रयतुं तुंबुरूणि॥ सग्रंथिकानि तु

दिविंत्रकचकैव्यकुष्टमाद्री॥ कपौष्करविडंगविषायुतानि। पथ्यायावत्यमूत्रिगजपिप्पलिसंयुता
निताबत्प्रमाणमितगुग्गुलुयोजितानि। स्त्राघृतेनगुटिकामनुजैःप्रयोज्यापीतानुदुग्धजलकां
जिकमुष्णमूषान्।५५।पांड्वामयंहृदयमपस्मृतिमूर्ध्ववातमुन्मादमामपवनश्वयथुंप्रमेहांड्स्त
ष्टकोष्टकटिवंक्षणकुक्षिकक्षाम्लानिनाशयतिकुष्टकिलासरोगान्। पथ्याक्षारद्वयंयवक्षारस्व
र्जिकाक्षारौ। त्रिकटुकादीनामितरेतरद्वंद्वं। हरिद्राशुक्वादारुहरिद्रा। अपराहरिद्रा। दारुदेव
दारुलवणत्रयं। सैंधवविडसौवर्चलानि। मग्रंथिकानिमपिप्पलीमूलानि। त्रुघादीनियुतानि
। त्रुटिरेला। माद्रीकंमाक्षिकधनं तु। पौष्करंपुष्करमूलं। विडंगंक्रमिजित्। विषाअतिविषा। शेषाणि श्री०टी०
प्रसिद्धानि। गजपिप्पलीहस्तिपिप्पली। तयासंयुतानिक्षारद्वयादीनिद्वादशियावंतस्त्रानि १२४
समुदितानिभवंति। तावत्प्रमाणमितःप्रमाणीक्रतोयोगुग्गुलुः। सनया। तेनसंयुतानिसंयुता

नि। एषांघृतेनगुटिकांक्रत्वामनुजैःप्राणिभिःप्रयोज्याप्रयोजनीया। पीताअनुपश्चात्तदणन्दुग्धज
लकांजिकमुष्णयूषायस्याःसातया। पांड्वामयादीन्नाशयति। ऊर्ध्ववातःप्रतिहतमुद्गारः। तथावग्रे
यांतरं। अधःप्रतिहतोवायुःश्लेष्मणामारुतेनवा। करोत्यनिशमुद्गारमूर्ध्ववातःसउच्यतइति। आ
मपवनआमवायुः। किलासश्वित्रमिति॥ ॥इतिशूलचिकित्सासमाप्ता॥ ॥शूलचिकित्सानंत
रंयथोद्देशमुदावर्त्तचिकित्सितमाह॥ ॥गोमूत्रराठफलरामठदंतिनीलिकंकुष्टसैंधवविडैश्च
गुडपूगादैः। आगारधूममरिचैरितिवर्त्तिरेषान्यस्तागुदेग्रथितविट्वटकामयघ्नी।।१७।गोमूत्रा
दिवर्त्तिरेषागुदेन्यस्तायोजिताग्रथितविट्वटकामयघ्नीभवति। विट्पुरीषं। तस्यवटकाःग्रथिता
श्चतेविट्वटकाश्चग्रथितविट्वटकाः। तदाख्यआमयोरोगःग्रथितविड्वटकामयः। इत्यावर्त्ति ७
ःतंहंतियावर्त्तिःसाग्रथितविट्वटकामयघ्नी। राठफलंमदनफलं। रामठंहिंगु॥ शेषाणिप्रसिद्धानि

म।

गोमूत्रादिद्रव्यैर्गुडप्रगाढैर्गुडप्रधानैः॥ आगारधूमोऽथ हृद्यमप्येन सहितैस्मन्निश्रैः। एतदुक्तं भव
ति। गोमूत्रे गुडमग्निना विलाप्य रामठफलादीनां चूर्णं प्रक्षिप्याङ्गुष्ठप्रमाणां वर्त्तिं कृत्वा गुदे न्यस्त
व्या॥ इति उदावर्त्तचिकित्सा समाप्ता॥ ॥उदावर्त्तचिकित्सानंतरं यथोद्देशं मूत्रकृच्छ्रचिकित्सि
तमाह॥ ॥त्रुटिहरेणुकणावृषयष्टिकात्रिकटकोरुबुकोपलभेदकैः। शृतमिदं जलमश्मजरू
कटं जयति माश्मरिमूत्रविनिग्रहं॥ १५८॥ त्रुट्यादि निःशृतमिदं जलेघ्नायं त्र्यश्मजरूकटं शिला चौ०टी०
जतुप्रक्षेपेण पीतं मूत्रविनिग्रहं मूत्रकृच्छ्रं जयति। माश्मरिश्चाश्मयमिह। त्रुटिरेला। हरेणुरेणुका।
कणा पिप्पली। वृषवासकं। यष्टिका यष्टीमधु। त्रिकंटको गोक्षुरकः। उरुबुकः एरंडः। उपलभेद
कः पाषाणभेदकः। एभिः पलप्रमाणैः शृतं पक्वं शिलाजतुकर्षयुतं मूत्रकृच्छ्रं जयति निवारयतीति। १२५
इति मूत्रकृच्छ्रचिकित्सा समाप्ता॥ ॥मूत्रकृच्छ्रचिकित्सानंतरं यथोद्देशं शोषचिकित्सितमाह॥॥
एलोपकुल्या मधुका श्मभेदकौ तीक्ष्णं इक्षुरस कोरुबुकै क्वाथं पिबेत् ... प्रधान मेशर्करा ... श्मरि मूत्राश्मरी

शोषातुरस्य ज्वररक्तपित्तकासारुचिभिः समन्वितस्य। विद्धेदिनस्यापि ज्वरस्य क्रिया न का
र्या। किंशतैर्निवृत्तिः पर्यङ्कशतैः साध्यासाध्यविभागज्ञैः। ईदृशस्य शोषातुरस्य क्रिया न कार्या हि
रा निवृत्तस्य। ज्वरश्च रक्तपित्तं च कासश्च अरुचिश्च श्वासश्च तेन तथा तैः समन्वितः संयुक्तः उपद्रु
तः। विद्धे दिनस्यापि निवारस्य। कृतम्वरस्य ज्वरनेदयुक्तस्य। इत्थंभूतस्य साध्यस्य क्रिया चिकि
त्सा न कार्या। गर्हितत्वात्। तथा च सुश्रुतः। एकादशभिरेतैर्वा षड्भिर्वापि समन्वितं। जह्याच्छोषार्दि
तं जंतुमिच्छन् सुविपुलं यशः॥ अथ कीदृशस्य ततः कार्या चिकित्सेत्यत आह॥ ७०॥ विज्ञान्वितस्य
त्यवतश्च जंतोरसंदेवके रविगमयस्य। बलोपपन्नस्य सतश्चिकित्सां विकित्सकैः कस्यामिरेव
द्या॥ ७०॥ विरंस्वं तेन स्त्रीतो विरामितः सर्वधनाः तस्याः आत्मवतश्च आत्मनो हितस्यात्रिसंदेवके
ः न संदेहो मंदबुद्धीनां दक्षिर्यस्य। सत्त्ववत्संदेवक्रियस्य। न विरमविरंशोक काजमायथ्यां नो
क्षामयो रेगो।

यस्मात्स जीवत्यविरामयश्चस्मात् बलं शारीरमोजः संज्ञं॥ तेनोपपन्नः संयुक्तः तस्येत्यनेन तस्य जंतोः स
त्तां स्थितिं क्रियासु कैवेंद्यैः स्थितिं क्रियां कस्य विदे वशो धातुरस्य न फलाहृष्टाः चिकित्सति॥७॥ सांप्रतं चिकित्सित
माह॥ ॥द्विपंचमूलीजलसिद्धमाज्यं वामा घृतं वाप्यथ घघलं वा॥ हितं पयः छागलमथवाथः प्रयु
ज्यते नागबलाविधानं॥८॥ द्विपंचमूली दशमूली॥ तस्याः जलं क्वाथः॥ तेन सिद्धं साधितं आज्यं घृतं वामा
घृतं वा वामया संस्कृतं घृतं वा सा घृतं॥ अथ घघलं वा हवेंक्किं हितं भवतीति॥ पयश्छागलं क्षीरं॥ अ
थ वा यश्चाग्नी संपर्को हितो भवतीति॥ नागबलाविधानं च प्रयुज्यते॥ प्रकर्षेण युज्यते॥ क्रियत इ
त्यर्थः॥ अन्यान्यपि रसोन पिप्पलीशिलाजतुविधानानि प्रयुज्यंते॥ इदं तु प्रकर्षेण नागबलाविधा च०टी०
नेन तथा वक्तुमुक्तं॥ रसोनयोगं विधिवत् रूययात् नहीरेणू नागबलाप्रयोगं॥ सेवेत वा मागधिका १२६
विधानं पयसो पयोगं जतुनोऽश्मजस्येति॥८॥ अधुना च्यवनप्राशमाह॥ ॥श्टंगीतामलकीफल

विकबलापथ्याष्टवर्गामृताजीवंतीत्रुटिचंदनागुरुसटीद्राक्षाविदार्यंबुदैः॥ वर्षाभूदशमूलपुष्करवृ
षैः सार्द्धं पयकुंभमानिकैरष्टद्रोणेन शतानि पंच विपचेत् धात्रीफलानामतः॥ १९१ उद्धृत्यामलकानि तैलघृ
तयोः षड्भिश्च षड्भिः पलैः भृष्टान्यर्द्धतुलांशानि यथाविधिवन्मत्स्यंडिकायाः पचेत्॥ ३॥ ते घृतमधुनः पलानि
कुडवं वा स्थाप्य तुजांतिकान्मुष्टिर्मागधिका पलद्वयमयं प्राशः स्मृतश्च्यावनः॥ १९३ न शोषः सापफल्यं व्र
जति वपुषि स्नीयमाणेऽपि जंतोर्न मूर्छा नो छर्दिः स्मृडपि च न वश्या सकामाद्यश्चानच्चालक्ष्मी र्विघ्नंकर
त्रिदपि न च व्यापदः संभवंति॥ प्रयोगादेतस्मान्मनसि न धियो विभ्रमं त्रांति मंतः॥ १९४ प्रसरति पुरः प्र
ज्ञाऽज्ञे येजरा जडतां व्रजेहि इह ध्वस्तिं पदं नैवा कस्माद्दलीपलितानि चाप भवति न भयं रुक्षः कायेन चास्य द
ग्राम्नुयुरुश्च भवनर विनिता प्राज्ञाः प्राशाद्यु एप शतान्यपि॥ १९५॥ श्टंगपादि निःसार्द्धं धात्रीफलानां पंचश
तानि अष्टद्रोणेन विपचेत्॥ श्टंगपादीनामितरेतरद्वंद्वः श्टंगीकर्कटश्टंगी॥ तामलकी हरहालिका॥ फल

त्रिकं त्रिफला। बला वाट्यालकः। छिन्ना गुडूची। विदारी क्षीरविदारिका। सटी कचूरः। नेदा जीवंती सुवर्णजी॥
वंती। दशमूलं द्विपंचमूलं। चंदनं रक्तचंदनं। घनं मुस्तं। नीलोत्पलं नीलपद्मं। एला प्रसिद्धा। वृषो वासक(
कः। मृद्वीका द्राक्षा। अष्टकवर्गः प्रवीक्तः। पौष्करं पुष्करमूलं। मृद्वीकादियुतैः संयुक्तैः। एभिः सूक्ष्मैः पादिनिःष्ठ
थकपालिकैः प्रत्येकं अक्षप्रमाणैः। सार्द्धमहाधात्रीफलानां आमलकीफलानां पंचशतानि। अपांसलि
लानां द्रोणमष्टौ तं। तेन विपचेत्। क्वाथयेच्चतुर्भागावशेषं यावत्। अतोम्भः क्वाथमुद्धृत्य पृथक्कृत्वा
आमलकानि तैलघृतयोः प्रत्येकं षड्भिः पलैर्युतानि। आमलकानि भृष्टानि तलितानि। अगलितखंडो
मत्स्यंडिका। तस्यास्तुलार्द्धं पंचाशत्पलानि निधाय क्रियाविधिवत् लेहविधिना पचेत्। तस्मिन्नवलेहे च्रो०टी०
शीते जाते मधुनः षट्पलानि। तुगाक्षीर्याश्चत्वारि पलानि वांशपा वंशरोचनायाः। चतुर्जातकं प्रवीक्तं। तस्मा
त्सुष्टिः पलं। मागधिका पिप्पली। तस्याः पलद्वयं। एतत्सर्वं क्षिप्तं चूर्णं स्नात्वाद्विपेत। अयं च्यवनःप्रा

शः स्मृतः कथितः। एतस्मात् च्यवनप्राशनप्रयोगात् जंतोर्वपुषि शरीरे क्षीयमाणेऽपि शोषादयः स्य फलं प्र
फलत्वं न व्रजंति। न च मनसि व्यापदः संभवंति। उन्मादादयो मानसविकाराः। न च धियो बुद्धयः भ्रांति विभ्रांति
।स्मरयंति अंतरं तःकरणे प्रज्ञा अवबोधो हेये ज्ञातव्ये पुरः भ्रमतः प्रसरंति। नरा वृद्धत्वं न जंतं भजेत्। वि(
अच्युत्वमायातीत्यर्थः। वलयश्च पलितानि च। नैवाकस्मात् मद्यमापदमास्यदं विदधति कुर्वंति। न च क
श्चो रोगेभ्यो भयं भवति। च्यवनो नाम ऋषिस्तेन रचितो विरचितः प्राशः च्यवनप्राशः। च्यवनरचित(
प्राशः। तस्य प्राशनं प्राशः। प्रकर्षेणास्यवहारो। तस्मात् अत्र उपपञ्चशतानि कायेशरीरे आस्यदं स्थानं न
प्राप्नुयुः कथं वनापि॥ च्यवनप्राशनानंतरमनृतप्राशनमाह। छा। द्राक्षाजमांसः मृदुगंधविदारिके
लुधात्री वरीरसमम्रं विधिवद्विपाच्य। प्रस्थं घृतात् मधुकाष्टकवर्ग जीवीगीवीरावरीबृहतनागबलाब
लाभिः। द्राक्षाककसेरुकपरूषकनालिकेरशृंगाटकोत्पलपियालमधूलिकाभिः शृंगी मृणाल॥

कपिकच्छुकणामदीनिः॥ मौम्यान्विता नि रितिमारिवयायुतानि॥ ८७॥ शीतैः परैः द्विनिमिता ईतुलासमेतं प्र
स्थं दधकमधुनो मगधपलेद्वे द्वार्धपालिकमितो घणनागतुष्पृष्टधीवरांगदलचूर्णयुतः प्रयोज्यः॥
८८॥ शास्त्रः शोषवतामयस्मृतिवतामुन्मादिनां मेहिनां हिध्माकामलिनामरोचकवतां मश्वासिनांका
सिनां जर्धमूत्रकृच्छ्रदरप्रगूढमनसां रुजो गिणां गुल्मिनां च्छीणानामुरसा निवध्निरमृतप्राशः प्रकाशी
कृतः॥ ८९॥ घृतान्नप्रस्थं द्राक्षादिभिः रसैः समं मधुकादिभिः कल्कीकृतं विधिवत् विपाच्य प्रयोज्य। द्राक्षा
दृद्धीकाश्चां जैमोमोत योः रसमथ्व दुग्धं च विदारिकावरस्तुश्चधात्रीवा वरी वा आसां रसाः॥ रसशब्दः कथे
भ्वरसे च वर्तते। द्राक्षादिभिः रसैः सम्मभिः प्रत्येकं प्रस्थमितैः। घृतप्रस्थे कर्षप्रमाणैर्मधुकादिभिः कल्की
कृतैर्विपचेत्। मधुकं यष्टीमधु। अष्टकवर्गी सर्वोक्तः। मागीं ब्राह्मणयष्टिः। वीरा क्षीरकाकोली। वरी श वै० टी०
तावरी। उत्पलं नीलोत्पलं। मधूलिका यष्टीमधु। शृंगी कर्कटशृंगी। मृणालमुशीरं। मौम्य शालिपणीं॥ १२८

मारिवाप्युत्पलमारिवा। शोषाणि द्रव्याणि प्रसिद्धानि। शीतैः अपरस्मिन् दिने सिताशर्करातस्या
अर्धतुलासमेतं संयुक्तं। किं। प्रस्थं। कस्य। मधुनो माक्षिकस्य। मगधा पिप्पली। तस्याः द्वे पले। तस्मर्वं द्वा
अर्धपलिकेन नागेन मितानि अर्धपालिकमितानि च तानि ऊषणनागतुष्पृष्टधीवरांगदला
नि च। तेषां चूर्णं तेन युतः संयुक्तो घृतप्रस्थः प्रयोज्यः। प्रयोजनीयः मतवामृतप्राशः। प्रशस्यः प्र
शस्तः केषां शोषवतादीनां अमृततुल्यः प्राशोऽमृतप्राशः। प्रकाशीकृतः प्रकटीकृतः। के निघण्टि
र्वेद्यैः सर्वैराचार्यैरिति अमृतप्राशानन्तरं शिवगुटिकामाह॥ ॥ शिलाजतुप्रयमं शिला
जतु जलेनाट्यं नवेत्रैफले त्रिकाथे दशमूलजेः पृथक् दनुविन्नोद्भवायां रसे। वा घालक घ
ने पटोलसलिलेयष्टीकषाये पुनर्गोमूत्रैः पृथक् पयस्यया। पिवगवामेषांकषाये ततः ९० शर्करा द्री
भकालेरविताप्योगुरु रूक्ष्णं स्निग्धं निःशर्करं गोमूत्रगंधगुलोनयुक्तं शिलाजतुश्रेष्ठं ज्ञातव्यं॥ त

अवगस्२ यावच्छुष्कता।। तेषु यत्तत्समलघु स्निग्धं निःशार्करं च यत्।। गोमूत्रगंधं पत्रस्थापितं तत्स्खलनं प्रचक्षते।। त
द्गुलोहादेका निंबगुडूचिसर्पिर्यवैर्यथावत्परिधूपयेत् दुष्टौघमक्षीकीटपतंगदंशसंतानिकादोषनिवा
रणार्थं।। एतद्द्रव्यैर्धूपयेत्तत्संतानिकादीन्दोषान्नाशयति।। अतोऽनंतरं जलशुद्धं ग्रंथं जातं ततः स्था
पयेत्तं दिवसेत्तावत् यावच्छुष्कं तनुं।। प्राकृते वलं जलनक्षेतं शुष्कं कार्येस्ततो नाव्यमिति।। जलशुद्धिवि
धानं तु यं यो ततो वक्ष्यते।। उष्णोऽथ कालेरविता पयुक्ते ग्रंथे विवाते सम मनुमिचागे।। चत्वारि पा
त्राण्यसितायसानि न्यस्यातपे तत्र मनोऽवधानः।। शिलाजतुश्रेष्ठ मथैकपात्रे प्रक्षिप्य तस्मात्त्रिगु
णं चतोयं।। उष्णं तत्र दद्यात् तमत्र दत्वा विशोधयेत्तन्मृदितं यथावत्।। ततश्च यत्स्वच्छमुपैति चोर्ध्वं नी०री० १२९
विलीयमानं रविरश्मितप्तं।। पात्रान्तरे न्यस्तततो निरस्य तत् तत्रा परं कोष्णजलं क्षिपेच्च।। पुनश्च
तस्माद्परत्र पात्रे तस्मात्तथा पात्रा दपरत्र भूयः।। पुनस्ततोऽन्यत्र विधाय यत्नं यत्संहितं तत्स्तु नराह

रेद्वा यदा विशुद्धं जलमत्र न स्यात् तमम्बुचामान्मलमेत्य धस्तात् तदात्यजेत्तत्र सलिलं मलं च शिलाजतु
स्यात्कलशुद्धमेव। शुद्धं जावित्त युक्तं च विधिनानेन मानव।। शिलाजतु प्रयुंजानः सर्वरोगैः प्रमुच्यते
इति।। एवंश्रेष्ठं धूपितं गतदोषं जलशुद्धं च जातं ततः कार्यं भाविना मारणेन।। त्रीन्वारानि त्यादि
।प्रथममेव शिलाजतु त्रिफलेन जलेन भाव्यं भवेत्।। त्रीन्वारानुत्री एप होरात्राणि।। तत्रायं वारशब्दो
ऽहोरात्रवाचकः।। यत्तो वारेणोत्थादिना अहोरात्रं व्याप्तं भवति। एकेनाहोरात्रेण एका भावना भ
वति। द्वितीयेन द्वितीया। तृतीयेन तृतीया। एवं त्रीन्वारानिति।। तथा च वरक।। कौटजत्रिफला
निंबपटोलघननागरैः।। भाविताति दशाहानि द्वाहोरात्राणीत्यर्थः। त्रिफलया संस्कृतं त्रैफलं
जलं क्वाथो। कथं त्रिफलायाः क्वाथसंस्कारेण भावनार्थं क्रियते।। शिलाजतु तुल्यं भावनाद्रव्यं ज
लमष्टगुणं दद्यात्। कथितं वतु भागावशेषं शृतं जातं तस्मिन् शिलाजतुमुखोऽसि प्रक्षिपत्।।

ह्लिश्वा वालोड्य साधयेत्। तथा च क्षारपाणिः। शिलाजतु समं द्रव्यं क्वाथमष्टगुणे जले। पादावशेषं
तत्र तं तस्मिन् कोष्णे विनिक्षिपेत्। अन्यैरप्याचार्यैः अष्टभागावशेषः क्वाथः क्रियत इत्युक्तं। तथा
च ग्रंथांतरे। सम गिरिजमष्टगुणितैः क्वाथ्यं तद्भावनौषधं तोयैः। तन्निर्यूहेऽष्टांशे प्रतप्ते प्रक्षिपेद्गि
रिजं। तत्समरसतां यातं संशुष्कं प्रक्षिपेत्तु रसे भूयः। स्वैः स्वैरेवं क्वाथैर्भाव्यं वारान्भवेत्सप्त। एवं
त्रैफले क्वाथे भाव्यं भावनीयं [illegible] तदनंतरं दशमूलक्वाथेन। तदनुपश्चात् छिन्नोद्भवायाः गुडूच्या
रसे क्वाथे। ततश्च वाट्यालक्वाथेन च बलाकषाये। ततोऽनु पटोलसलिले क्वाथे। पुनर्यष्टीकषाये
। यष्टीमधुक्वाथे। अथानंतरं गोमूत्रे। एवं त्रीन् त्रीन्वारान् क्रमेण एकैकेन त्रिफलादिकषायेण नी०टी०
भावनीयं। तदनंतरं गवां पयसि दुग्धेन भावनीयमेकं वारं। ततः पश्चादेषां द्राक्षादीनां क्वाथे सप्तवा १३०
रान्भावयेदिति। कथं एष [illegible] गुणो विशेषो लभ्यते इति चेत्। तथा च ग्रंथांतरे। कालेरविताप्ये

न्म्लापयेत् शिलाजतु अथ वरं त्रिफलारससंयुक्तं त्र्यहं विशुद्धं पुनः शुष्कं। दशमूलस्य गुडूच्या रसे बलाया
क्वाथे पटोलस्य। मधुकरसे गोमूत्रे त्र्यहं त्र्यहं भावयेत्क्रमशः। एकाहं क्षीरेण तु ततो भावयेत्तु पुनः शु
ष्कं। सप्ताहं भावयेत् द्राक्षाद्याख्यस्य क्वाथेन तेषां। यथालाभमिति॥ ॥प्रागुक्तमेषां कषायाः तत्र (केषामित्याह)॥ बा। द्रा
क्षाभीरुविदारिकाद्वयपृथक्पर्णीस्थिरापौष्करैः पाठाकोटजकर्कटाख्यकटुकारास्नाम्बुदालंबुषैः। दं
ती चित्रकचव्यवारणकणावीराष्टवर्गौषधैः द्राक्षेऽवरणक्षितेपलमितैः रेभिः शृतैर्भावयेत्॥२३॥
एभिर्द्राक्षादिभिः शृतैर्भावयेत्। द्राक्षादीनामितरेतरद्वंद्वः समासः। द्राक्षा प्रसिद्धा। अभीरु शतावरी॥
विदारिकाद्वयं कृष्णक्षीरविदारी मेदा विदारी च। पृथक्पर्णी पृष्टिपर्णी। स्थिरा शालिपर्णी। पौष्करं
पुष्करमूलं। कोटजाः इंद्रयवाः। कर्कटाख्यं कर्कटशृंगं। अम्बुदो मुस्ता। अलंबुषा मुंडितिका। वारणक
णा हस्तिपिप्पली। वीरा क्षीरकाकोली पृष्टिपर्णी॥ अष्टवर्गौषधानि प्रागुपदिष्टानि काकोल्यादीनि। शे

षाणिप्रमितानि।एभिर्द्राक्षादिभिःपलमितैःप्रत्येकंपलप्रमाणैःश्रुतैःक्वथितैः।कस्मिन्द्रोणेचर अ०१
णस्थितेपादशेषेभावयेत्भावनंकुर्यात्।सप्ताहोरात्राणिशिलाजतुपलानिषोडश।।क्वाथाढकेनस
प्तांशविभागिकेन।एकैकेनांशेनैकैकमहोरात्रंतेनभावयेत्।यावत्सप्तदिनानि।ननुकथमेतद
वसीयते।यावताप्रतिदिनमेकक्वाथाढकेनकस्मान्नभाव्यते।इत्यत्रोच्यते।एषांकषायेइतिवचनात्।
अन्यथाबहुवचनेनैवकषायैरितिब्रूयात्।ग्रंथांतरेप्युक्तं।सप्ताहंभाव्यंस्यात्क्वाथेतेषांयथा
लाभमित्यत्रापिबहुवचनेनैवप्रयोगः।भावनाद्वाढकसप्तांशेनैवषोडशपलप्रमाणस्यगिरि
जस्यैकाभवति।तथाचग्रंथांतरं।द्रवेणयावताशुष्कमेकीभूयार्द्रतांव्रजेत्।द्रवप्रमाणंनिर्दिष्टंभि नी०टी०
षग्भिर्भावनाविधौ।तस्मात्स्थितमेतदिति।ता।अनेनक्रमेणशुद्धंशिलाजतु।ततश्चैतैर्योजये १३१
त्।इत्यतआह।ता।धात्रीमेषविषाणिकात्रिकटुकैरेभिःपृथक्पंचभिर्द्व्यंशद्विपलोन्मितैरपिपलं

चूर्णाद्विदारीभवात्।तालीमात्कुडवश्चतुःपलमितःप्रक्षिप्यतेनसर्पिषातैलस्यद्विपलंपलाष्टकंमधोस्तैः
साद्रिषट्योजयेत्।७१।धात्र्यादीनामितरेतरद्वंद्वः।धात्रीआमलकी।मेषविषाणिकामेषशृंगी।त्रिकटुकं
शुंठीमरिचपिप्पल्यः।एषांधात्र्यादीनांप्रत्येकंद्विपलिकानांचूर्णं।विदारीभवाच्चूर्णात्पलं।तालीमात्
तालीसपत्रात्कुडवश्चत्वारिपलानि।सर्पिषोघृतात्चतुःपलं।एतत्सर्वंप्रक्षिप्यतेनियुज्यते।तैलस्य
द्विपलं।प्रधानकल्पनयातिलतैलस्य।क्षौद्रात्मधुनःपलाष्टकमष्टौपलानि।सिषक्वैघोयोजये
त्।योगंकुर्यादिति।७२।ततःपुनरेतैर्योजयेदित्याह।७३।तुल्यंपलैःषोडशभिःसितायास्त्वक्क्षीरिका
पत्रककेसरैश्च।बिल्वांशकैस्त्वक्त्रुटिमंप्रयुक्तैरित्यक्षमात्रागुटिकाःप्रकल्प्याः।७४।तामासमेकत
मांप्रयुज्यविधिवत्प्रातःपुमानन्नेजनात्प्राग्वामुद्गदलांबुजांगलरसंशीतेष्टंतंवाजलंमाद्वीकंन
दिग्मगुर्वशनन्नुक्पीत्वापयोवागवांप्राग्नोत्यंगमनंगवत्सुभगतांसंपन्नमानंदन्ततः।७५।शिला

शर्करा तस्याः षोडश पलानि पलैस्तुल्यैस्तुल्यप्रमाणैः त्वक्क्षीरिका तुगाक्षीरी पत्रं तमालपत्रं किसरं नागकेसर
प्रसिद्धं त्वक् वरांगं त्रुटिः एला एते निर्दिष्टाः शाकैः पलप्रमाणैः संप्रयुक्तैः संयोजितैर्युक्तैः शिलाजतु अस्मा
त्राः कर्षप्रमाणाः गुटिकाः प्रकल्प्याः प्रकल्पनीयाः ताश्च गुटिका नवे घटे न्यस्ता तीक्ष्णकुसुमवासिते स्थाप्याः इ
ति॥८॥ इदानीमस्याः शिवगुटिकायाः प्रयोगविधिमाह। तामिति। पूर्वोक्तविधिकल्पितानां गुटिकानां एकत
मां प्रयुंजन् पुमान् अनंगवरं गं प्राप्नोति। तामामेकतमां प्रयुज्य प्रकर्षेणोपयोगं कृत्वा विधिवत् स्वस्य
न मंगलादिविधिना प्रातः प्रभातकाले भोजनात् प्राक् अथवा भोजनात् उ मान् पुरुषः किं विशिष्टः अ
गुर्वशनभुक् गुरुवं तदशनं गुर्वशनं तदनंतरं भुंक्ते इत्यगुर्वशनभुक् एतदुक्तं भवति लघ्वशनभोजी। मु
द्गरसं बुभुक्षुः पुरुषः पुंपौष्टिकपयसा व्याधिबलं तेन वपीवाः अं गं शरीरं सुभगता सपत्नमात्रं दृ
ष्टं कामदेव वत् प्राप्नोति इति॥९॥ सांप्रतं अस्य रोगप्रत्यनीकतामाह॥१०॥ शीघ्रं कर्षं प्रत्यवमंथुवेपथुव

×अनंगवदत्वा ×नंयघा॥२

नी॰टी॰
१३२

सीपांड्वामयक्षयप्लीहार्शःप्रदरप्रमेहपिडिकामेदाश्मरीशर्करा। कृच्छ्रोगार्बुदवृद्धिविद्रधियकृत्योन्या
मयामानिलान् कृत्स्नांश्च भगंदरहृद्रुजःस्मृतीप्रत्यनीकर्षः॥१०॥ वातानां कफप्रबलं प्रहृद्रुगुदरं कष्टं किला
संत्रसीन् कासं श्वासमुरःक्षतं क्षयमपस्मितं मपानात्ययं। उन्मादं मदमप्य पस्मृति मतिस्थौल्यं क्ष
शांतं तनोरालस्यं च हलीमकं च शमयेन्मूत्रस्य कृच्छ्राणि च॥११॥ इयं शिवगुटिका शोफादीन् सर्वान् स
र्वान् तान् शमयेत्। शोफादीनामितरेतरद्वंद्वः। शोफः सर्वसरः ग्रंथिशोफसमुत्थानः प्रसिद्धः। आव
मंथुः लिंगव्याधिः स्फकचग्रोषकृत्। वेपथुः कंपः। योन्यामयाः योनिरोगाः। आमानिलं आमो वायु
ः। वातानां कुवातरक्तं। प्रबलं प्रकृष्टं बलमवगाहमित्यर्थः। प्रवृद्धमुदरं प्रवर्द्धितमुदरं। कष्टं च ग्रोषं
किलासं श्वित्रं। क्षयं शोषं। अस्मृतिं विस्मृतिं। कफपित्तं। अवर्द्धितस्थकृणावस्थः। उन्मादो मदसंज्ञः। अतिस्थौ
ल्यं मेदरवं क्षशांतं क्षशातान्तनोः शरीरस्य। ननु चैनोरतिस्थौल्यं कथं वमपहंतीति विरुद्धं अत्रोच्यते।
त
च्या

शाकं सर्वं घृतयूषदाडिमांबुद्धराणां षष्टिकौदनभोजनानि स्थूलवद्दृत्राणि। आयकं च तक्रमाषरसक्षीर
रक्तशालिभोजनं तच्छ्रावृं दंतीति ॥७॥ सांप्रतं रसायनत्वमाह ॥ ॥ऋटितिन्नरयामर्दश्चैतैरकालजरान्नत्ते
हृतमलिकुलाकारैरेभिः शिरस्थशिरोरुहैः वलिवदवलिव्यप्तातंकं वपुश्चमुद्द्हन्भवति नितांतस्त्री
णांगंतुं नभोजनवल्लभः ॥११॥ अलिकुलाकारैः शिरोरुहैः केशैः शिरोहृतं । व्यप्तातंकं वपुश्च समुद्द
न् जनः स्त्रीणां शांतं गंतुं प्रभवति । शिरो मस्तकं । ऋगितिशीघ्रं । अकालजरयामर्दश्चैतैरेभिः श्रुक्ले
क्तैः । शिरोरुहैः केशैः शिरोहृतं मत्त । अलीनां भ्रमराणां कुलं अलिकुलं अलिकुलस्येव आका
रो येषां शिरोरुहाणां तेन वं त्यालिकुलाकाराः । तैर्हृतं शिरः समुद्द्हन् एतदुक्तं भवति । अत्यंतशक्तैः नी॰टी॰
वलयो विद्यंते यस्मिन् वपुषि तद्वलिवत् । अवलि । अपगता वलिर्यस्मात् विविधप्रकारेण व्यप्ताः । छि १३२
प्ता आतंका रोगा यस्मिन् तत् व्यप्तातंकं । तद्वपुः शरीरं समुद्द्हन् । जनः जनानां वल्लभः । प्रियो जनवल्ल

भः स्त्रीणां शांतं गंतुं प्रभवतीति ॥७॥ सांप्रतं पुनरस्याः शिवगुटिकायाः फलमाह ॥७॥ स्त्रिमितमतिर
प्यज्ञानांधः सद्यस्सपटुः पुमान् सकृदपि यया ज्ञानोपेतः श्रुतिस्मृतिमान् भवेत् । व्रजति च यया युक्तो यो
गी शिवस्य समीपतां शिवगुटिकया कस्तामेनां करोति न मानुषः ॥१८॥ यया युक्तो योगी शिवस्य समीप
तं व्रजति । तामेतां शिवगुटिकां मानुषः को न करोति । स्त्रिमितमतिरपि तु मान् पुरुषः । स्त्रिमिता जडा
मतिर्यस्यासौ स्त्रिमितमतिः । अज्ञानांधः न ज्ञानमज्ञानं तस्मिन् अवबोधः । तेनांधो न किंचित् पश्यति । सद
पि मनायां अपटुरसुरवरः । एवं भूतोपि यया सत्तया सकृदपि स्तोककालमपि ज्ञानोपेतो ज्ञानसम
न्वितः । श्रुतिः श्रवणं स्मृतिः स्मरणं ते विद्येते यस्यासौ श्रुतिस्मृतिमान् मानुषः पुरुषो भवति । यया
शिवगुटिकया युक्तो योगं गतो योगी मुमुक्षुः शिवस्य शिवनगरकस्य समीपतां नेक घ व्रजति गछ
ति । कस्तामेतां शिवगुटिकां मानुषो न करोति । अपि तु सर्वः पवकरोतीति ॥७॥ अधुना अपरमपि शि

लाजंतुप्रयोगमाह॥ ॥फलत्रिककाथविशुद्धमादौ शुद्धं गुडूच्या दशमूलशुद्धं हिंस्रादिकाकोलिसुकांगा। दिशु
द्धं शिलाजतु स्यात्क्षयिषु प्रशस्तं॥ ४५॥ आदौ प्रथमं। फलत्रिकं त्रिफला। तस्याः काथेन सर्ववत्परिभा
षया विशुद्धं क्रियते। तदनंतरं गुडूच्या। ततो दशमूलेन। अनंतरं हिंस्रागणेन पूर्वोक्तेन। हिंस्राद्यय कु
पक्षीत्यादिना। ततोऽनुक्तकाकोलियुगादिगणेन। काकोलीद्वयमृद्धिवृद्धीत्यादिना शुद्धं शिलाजतु॥ प्र
त्येकमेकैकेन सप्तवारं क्रियते। एवं शुद्धमेव। एषामेव काथैर्यथादोषं पातव्यं। पत्रीयमानं क्षयिषु
क्षयरोगिषु प्रशस्तं स्यात्तत्रैव तत्। तथा च शुश्रुतः। तथैव योगं जतुनोऽश्मजस्येति॥ इति शोषचि
कित्सासमाप्ता॥ ॥शोषचिकित्सानंतरं यथोद्देशं कृमिचिकित्सितमाह॥ ॥फंजी फणिज्झकफल ती०टी०
त्रितयाखुकर्णीकाथः कृमिघ्नमगधाशिखिशिग्रुकल्कः। पीतः कृमीनपहरेत्कृमिजाश्च रुजश्च जं १३४
तोर्जयेद्य कणाकृमिजित्कषायः॥ २०॥ फंज्यादीनां काथः कृमिघ्नादिकल्कयुक्तः पीतः कृमीनपहरे

त्। कृमिभ्यो जाताः काश्चाः रुजो विकारान्। कस्य जंतोः प्राणिनः। तास्थापहरेत्। फंजी ब्राह्मणयष्टिका।
फणिज्झकं मरुवकं। फलत्रिकं प्रवोक्तं। आखुकर्णी मूषककर्णी। कृमिघ्नं विडंगं। मगधा पिप्पली। शिखी चित्र
कः। शिग्रुः शोभांजनकः। अथ शाष्टेन द्वितीयं योगांतरमाह। अथ कणा कृमिजित्कषायः पीतः जंतोः कृमि
१ जि भिः। कृमिजा रुजश्च जयेत्। कणा पिप्पली कृमिजित् विडंगमिति॥ २०॥ इति कृमिचिकित्सा समाप्ता॥ ॥
अथ यथोद्देशमिदानीं स्वमतेनो पांडुक्तानुक्तविषयमपरमपि कायचिकित्सितमाह॥ ॥एरंडतै
लं वृषणप्रवृद्धोपसर्गोपयुक्तं। इति मेतदुक्तं। सराजवृक्षामृतवच्छिवामाक्काथं हितं मारुतशोणिते
षु॥ २१॥ एरंडस्य तैलं एरंडतैलं गवां पयो गोदुग्धं। मह गोपयसमावर्त्तत इति सगोपयुक्तं॥ वृषण
प्रवृद्धौ हितमेतदुक्तं। पूर्वाचार्यैः। राजवृक्षादिकाथ एरंडतैलं मारुतशोणितेषु वातरक्ते हितं। रा
जवृक्ष आरोग्यवशिंबिः। अमृतवल्ली गुडूची। वा मां आटरूषकमिति॥ २१॥ अपरमप्येरंडतैल

प्रयोगमाह॥ ॥मूत्रेण वा दुग्धसमन्वितं वा सर्वोदरेषु श्वयथौ च शस्तं। पक्वाशयस्थे पवने प्रयोज्यमेरं
डतैलं सप्तरं यदि हि विरेचनाय॥७॥ एरंडतैलं गोमूत्रेण सह वा दुग्धेन समन्वितं विरेचनाय प्रयोज्यं सर्वोदरेषु
श्वयथौ प्लीहादरोगेषु शस्तं। श्वयथौ सर्वशरीरे शोफे शस्तं। पक्वाशयस्थे पवने वायौ प्रयोज्यमिति॥८॥ डाइ
द्रानी गुग्गुलुयोगमाह॥९॥ मूत्रेण वर्षाभ्रु सुरेंद्रदारु पथ्यामृतानां क्वथनेन वापि पीतो जयेद्गुग्गुलु
रेकः एवं शोफसपांडूदरमेदुरत्वं॥ मूत्रेण वर्षाभ्वादिक्वाथेन वा पीतो गुग्गुलुः एक एव शोफं सपांडुपां
डूदरमेदुरत्वं जयेत्॥ वर्षाभ्वः पुनर्नवा सुरेंद्रदारु देवदारु पथ्या हरीतकी अमृता गुडूचीति॥ ॥अपर
२ म शोफपि गुग्गुलुयोगमाह॥१०॥ ॥मूत्रेण वा शोफिषु गुग्गुलुः स्यात्कषायत्रिफलाक्वथनेन कुष्ठे मेदस्विनां वापि हि नी०टी०
तः कषाये खदिरादिजे वा शिखिमेयनेवा॥११॥ गोमूत्रेण शोथि। पुशोथवतां एव गुग्गुलुर्हितः स्यात् भवेत् कुष्ठे १३५
षु वा कुष्ठविकारेषु योग्यः त्रिफलाधरः खदिरसारस्य क्वाथेन तु गुग्गुलुर्हितः। मेदस्विनां मेहिनां

खिल्वादिके ष्यपुंपवमूलकषाये गुग्गुलुयोगमाह॥ ॥फलत्रिकक्वाथयुतो व्रणेषु कुष्ठेषु नाडीषु भगंद
रेषु। सकांचनारत्रिफलोपकुल्यः सगंडमालागलगंडरोगे॥१२॥ गुग्गुलुरिति अनुवर्त्तते। व्रणेषु द्विविधेषु शा
रीरेषु आगंतुषु च कुष्ठनाडीभगंदरेषु। फलत्रिकस्य क्वाथः तेन क्वाथेन युतः संयुक्तो गुग्गुलुर्हितः। कांचना
रस्त्रिफला च उपकुल्या च कांचनारत्रिफलोपकुल्याः। सह एतैर्वर्त्तते इति सकांचनारत्रिफलोपकु
ल्यो गुग्गुलुः। कांचनारो भीमकणवीरः। त्रिफला प्रसिद्धा। उपकुल्या पिप्पली। गंडमाला च गलगंड
रोगश्च गंडमालागलगंडरोगौ। सह ताभ्यां वर्त्तते इति सगंडमालागलगंडरोगः पुरुषः। तस्मि
न् हित इति॥ ॥वातामये वातरक्ते च गुग्गुलुयोगमाह॥ ॥वातामये विश्वबलागुडूचीरास्नात्रि
कंटकैरंडवृकस्थिरानिःढित्रोद्भवाक्वाथयुतः समीरे सशोणिते गुग्गुलुरेक एव॥१३॥ वातामये वात
रोगे विश्वादिक्वाथयुतो गुग्गुलुर्हितः। विश्वादीनामितरेतरद्वंद्वः। विश्वा शुंठी। त्रिकंटको गोक्षुरकः।

स्थिरा शालिपर्णी। समीरे वायौ शोणितसंयुक्ते। एतदुक्तं भवति। वातरक्ते छिन्नोद्भवा गुडूचीत
स्याः क्वाथेन युतो गुग्गुलुरेक एव हित इति। अथ मूत्रे हेतुकृच्छ्रे च गुडान्वयादियोगपंचकमा
ह॥ गुडान्वया मूत्रहरीतकी वा हिता तथारुष्करवर्द्धमानं। अर्शःसु मेहेषु हिता हरिद्राधात्री
रसे कुष्ठिषु मूत्रयुक्ता। ८७। अर्शःसु मेहशोथरोगेषु गुडान्वया गुडेन सहिता। अन्वया हरीतकी हिता॥
मूत्रहरीतकी वा हिता। गोमूत्रक्वथिते लेह्यवत्सिद्धं। हरीतकीशतं यथाबलं सह्यैडं। तथारुष्करवर्द्धमानं
हितं तथेति योगांतरमाह। अरुष्कराणि भल्लातकानि। तेषां वर्द्धमानं कथं च तत्क्रियत इति। तं व्या
नरे या व्याख्यायते। ग्रीष्मकाले गृहीतान्यापूर्णरसान्यनामयानि भल्लातकान्यष्टौ नियवपलले माल नी॰टी॰
षलले वा चतुर्मासावस्थितानि रेमं ते प्रयोक्तुमारभेत। मधुरस्निग्धशीतोपसंस्कृतशरीरः प्रथमं १३६
दशभल्लातकानि संकुट्य अष्टगुणेन सलिलेन क्वाथं कृत्वा अष्टभागावशेषं सदुग्धं घृतेनांतर्मुखम

प्यापि बेत। नान्येकैकभल्लातकोत्कर्षेण त्रिंशत्संख्या पुनरेकैकमपकर्षयेत। यावद्दश भल्लातकप्र
योगेनः परमुत्कर्षः कर्तव्यः। एवं भल्लातकसहस्रमुपयुज्यते। न घटतेय यो न घटने तथा द्वित्रिपा
रंपर्यां प्रदेशात् व्याख्यायते। त्रिंशत ग्रामो सप्तरात्रौ त्रिंशत् प्रयोगः कर्तव्य इति। तत एकैकमपकर्ष
येत् यावद्दश पुनरन्यस्मिन्नपि दिने दशेति। एवं भल्लातकसहस्रमुपयुज्यत इति घरते। जीर्णे घृतदुग्धा
५ह ना न्नंशालि षष्टिकौदनमनुलीनप्रयोगान्ते वद्दिस्मात्तस्य प्येवापवारः। तत्सप्रयोगात् वर्षशतमजरं
वयः तिष्ठतीति। मेहेषु च प्रमेहेषु धात्रीरसेन आमलकरसेन हरिद्रा हिता। कुष्ठिषु च कुष्ठरोगिषु मू
त्रयुक्ता गोमूत्रेण हरिद्रा हितेति। पीत्वा मासं वा पलाशां हरिद्रां मूत्रेणं तं पापरोगस्य जठे हति॥ बाव
गृहदोषिणां श्वित्रविकारिणां च योगमाह॥ ॥अथ स्कृति वीषादिरस्य सार। स्वगृहदोषिणां श्वित्रविका
रिणां च। आवल्गुजं बीजमुदारहरं त्रिविनीतकः च कुमलपूर्कपायैः। ८८। गृहदोषिणां कुष्ठीनं॥ गय

स्फुतिः सर्वं व्याख्यातं।। खदिरस्य सारः स्नानपानावगाहालेपनादिषु प्रयोज्यः।। तथा च सुश्रुते।। हृद्रुद्रच
कुष्ठमरखदिरं कुष्टपीडितः।। सर्वथैवोपयुंजीत स्नानपानाशनादिषु।। इति।। श्वित्रविकारिणां आवल्गुजं बी
जं वाकुचीबीजं बिभीतकवृक्षकूमलजयूकषायेहितसुदारं रत्याचार्याः।। मलपूका कोडुंबरिका स्यात्स्य विट
पा।। ननु च सर्वं श्वित्रचिकित्सिते बिभीतकवृक्षमलपूजटानामित्यादिको योगः प्रोक्तः।। किमर्थं पुनरु
क्तः।। योगांतरं।। तत्र हि गुडेन सह प्रयोगोऽत्र तु गुडरहितस्येति।। ८।। तथा गुल्मशूलादिषु योगत्रय
माह।। गुल्मेषु शूले पुर्व्वा हिंगु योगः सविश्वसौवर्चजउष्णकराकः।। गरातुरे स्मदितं वदंति रास्नामरु
व्याधिहरा प्रदिष्टा।। ९।। गुल्मशूलरोगयोर्हिंगुयोगो विश्वादिसहितः कार्यः।। विश्वा शुंठी।। सौवर्चलंरु
चकं।। उष्णकरं कं पुष्करमूलं।। गरेजत्रिमं विषं तेनातुरे रोगी तश्विनस्ते सम सुवर्णं हितं वदंति।। रास्ना मरुद्या १३७
धिहरा वातव्याधिहरा प्रदिष्टा उपदिष्टेति।। ८।। उन्मादादीनां पुंसां ब्राह्मीरसस्य योगमाह।। ।।उन्मा

दिनामुन्मदमानसानां मन उपस्मृतौ भूतहितात्मनां हि ब्राह्मीरसः स्यात् सवचः सकुष्टः सशंखपुष्पः स
सुवर्णचूर्णः।। १०।। उन्मादिनां उन्मादरोगिणां।। मनएवमानसं।। उन्मत्तं मनो मानसं येषां ते उन्मदमानसा
स्तेषां।। अपस्मृतौ अपस्मारे भूतैर्देवग्रहादिनिर्दितोऽनिरत आत्मा मनो येषां ते भूतात्मानः।। तेषां ब्राह्मी
रसः स्यात्स्वरसो वचासहितः।। सकुष्ट कुष्टेन सह।। सशंखपुष्पः शंखपुष्पया सह।। ससुवर्णचूर्णः सुवर्ण
चूर्णेन सहितः स्यात् भवेत्।। इति।। ८।। गुडूचीफलत्रिकयोः पथ्यकयोगद्वयमाह।। ८।। वातासृक्श्वित्र
पादिनां वमीषु हलीमके पांडुषु कामलायां।। मेहश्विनां चापि हिता गुडूचीफलत्रयं नेत्रविकारिणां चा ए
श वातासृक् वातरक्ते श्लीपदिनां श्लीपदरोगिणां।। वमीषु छर्दिषु।। हलीमके च कामलारोगभेदे पांडु
षु पांडुरोगिषु।। कामलायां कामलारोगे मेहश्विनां स्वजानां।। एषां सर्वेषां गुडूची हिता।। नेत्रविकारि
णां चाक्षिरोगिणां फलत्रयं हितमिति।। ८।। अतीसारे हरेरक्तपित्ते च पथ्यकयोगद्वयमाह।। ।।हिते

तिसारे कुटजोत्तरे षुमपर्पटच्चापिकिरा ततिक्ताः। मशर्करस्वा। पिसमाद्दिकश्च वामाकषायः स्वंषु
त्रे। ९७ अतीसाररोगे कुटजकषायकल्कचूर्णलेहप्रयोगो हितः। ह्वरेषु सर्वेषु मपर्पटः किराततिक्तको हितः। र
क्तपित्ते वासाकषायः शीतः शर्करामधुभ्यामद्दितो हितइति॥ ७॥ रक्तादिषु चतुर्षु रोगेषु पृथक्प्रयोगचतुष्ट
यमाह॥ ॥ रक्ताम्सुपंचाम्लकमुद्दिशंति श्रीरामयेपिप्पलिवर्द्धमानं। कोष्टोनकश्चापि यवृत्तदिकारेस्याद्दि
धीनांवरूणः प्रशस्तः। ९८ रक्तार्सुरक्तारोगेषु पंचाम्लकं उद्दिशंति। उपदिशंति। पंचानां बदरदाडिमवृक्षा
म्लचुक्रम्लचुक्रिकाणाम म्लानां समाहारः पंचाम्लकः। तं उपदिशंतीति। तथा चचरकः। कोलदाडिमवृक्षाम्ल | नी०टी०
चुक्रीकाचुक्रिकारसः। पंचाम्लकोमुख्यालेपः स्मयस्तम्लानिपठतीति। श्रीरामयेश्रीहरोगेपिप्पलिवर्द्धमानं प्र
वव्याख्यातमुद्दिशंति। यवृत्तदिकारे वयनहउद्दरेरोहीतकः। कषायचूर्णविलेहरूपतादिषु प्रशस्तः स्यादि | १३८
ति। विद्रधीनां वरूणः कषायादिषु प्रशस्तो भवतीति॥ ७॥ जठरामयादिषु गोमूत्रादियोगत्रयमाह॥ ८॥ गोमू

त्रमेकं जठरामयेषु विषोपसृष्टेषु शिरीषक......काशातकी मूषिकसंभवेषु विषेषु सांकोठजटाक
षायः। ९९ जठरामयेषु उदररोगिषु गोमूत्रमेकं भक्षणमुद्दिशंति। विषोपसृष्टेषु। विषैः स्थावरजंग
मैः। त्रिमेरुपसृष्टा। विषोपसृष्टास्तेषु शिरीषकल्कं पानाभिपानादिषु हितमुद्दिशंति। मूषिकसंभवेषु विषेषु
[illegible]कोशातकी सांकोठजटाकषायाः शस्ताः। अंकोठजटाकषायेण कोशातकीकल्कं पाययेदिति॥
॥ ॥ अथ धुनोर्ध्वं भोमध्यविभागे न निक्षत्रवा शरीरं गतरोगचिकित्सादिकमाह॥ ८॥ मन्यादनुश्रव
णलोचननासिकास्य जनागतानुगतजं स्वशिरोविकारान् नाशम्लानि दंति दृशाम्रजकषायपीताः सा
धनवासरपफलत्रितयोद्भवेन। १०० मन्यादिषु शिरः पर्यंतेषु येविकाराः स्तान् दशाम्रजकषायपीता
हस्त्याः पिप्पलीनिदंति। फलत्रितयाउद्भवो यस्यासौ फलत्रितयोद्भवः। तेन वासद पीताः स्थस्ताः सर्वो
कानेव रोगान् निहंति। वा शब्देन हिती यं कषायं कथयतीति॥ ८॥ सांप्रतं विश्वोषधयोगत्रयमाह॥

रास्नाकषायपरिपीतमथाश्वदंष्ट्राक्काथेन वामृतलताक्कथनेन वापि। विश्वौषधं हरति पादक
जागाद्यात्तक्किजानुजघनस्थलतात्रुजश्च॥ एषा रास्नाकषायपरिपीतमित्येको योगः। अथाश्वदंष्ट्रा गोक्षु
रकः। तस्य क्काथेन वा पीतमिति द्वितीयो योगः। अमृतलता गुडूची। तस्याः क्काथेन वा पीतमिति तृतीयो
योगः। किं तत्पीतं विश्वौषधं शुंठी। रुजो निहंति। केषु केषु जाताः। स्फिग्नितंबजानुनी च जघनस्थलं
च स्फिक्किजानुजघनस्थलं तेन तस्मिन् जाता रुजः। पादद्वारस्य कटी यावद्विभागः। पादकटीविभागस्तस्मात्
आऊरुमर्यादायां या रुजस्तानि हंतीति॥ ८॥ इदानीं कृतहिंग्वादियोगमाह॥ ॥पीतानि हिंगु सितजी
रकतुंबरूणि पथ्याग्निपुष्करजरालवणत्रयाणि। हृत्स्थकोष्ठगुदगुह्यरुजो जयंति संछिन्नमेतदिति का ना०टी०
यचिकित्सिते हि॥ ९॥ हिंग्वादीनि पीतानि हृद्यादिरुजो जयंति। नाशयंतीति। हिंगु रामठं। सितजीरकं श्वेत १३९
जीरकं। तुंबरु धान्यकं। पथ्या हरीतकी। अग्निश्चित्रकः। पुष्करजटा पुष्करमूलं। लवणत्रयं सैंधवबिडसौवर्च

लानीति। कायचिकित्सितं संक्षिप्तं संक्षेपेणोक्तमेतन्मया॥ इति शास्त्रः परिसमाप्तौक्तत॥ अथ कायचिकि
त्सितमिति। कोऽर्थः उच्यते। कायशब्देनाग्निरभिप्रेतः। तथा च वृद्धवाग्भटेनोक्तं॥ तमिमं कायमेवाग्निं प्रवदंति
मनीषिणः। योऽयं निर्दिष्ट इति स्त्रिग्धमाहारं सर्वदेहिनां। अनादिमध्यनिधनः सर्वतंत्रेषु पठ्यते। प्रत्नालक्ष्मस
माधुकोजीवस्सादिसनातनः। यस्त्र विकित्सेक्षीदं तं विषमं मंदमेव वा॥ आयुर्वेदानियोगेन स वै कायचि
कित्सकः। अथवा दोषधातुमलादिसंघातः कायः। तस्य ज्वरादिभिर्व्यापन्नस्य चिकित्सा कायचिकित्सेति।
॥इति तीसटसुतचंद्रटविरचितायां चिकित्साकलिकाटीकायां कायचिकित्सा समाप्ता॥ ॥८॥ ॥काय
चिकित्सानंतरं यथोद्देशं शालाक्यतंत्रमाह॥ ॥शालाक्यतंत्रमिति कोऽर्थः। उच्यते। शलाका शस्त्रेण
रोगगणे द्रष्टव्यः। शलाकायाः कर्म शालाक्यं। तत्प्रधानं तंत्रमनेन दोषप्रचाराद्यालोक्य तत्तंत्रं। तत्रोर्ध्वजत्रु
पगतानां रोगाणां नयनश्रवणवदनघ्राणादिसंश्रितानामुपशमार्थमतो नयनादिरोगाणां संख्यापि

परिज्ञानाय इदमाह॥७॥ ऊर्ध्वंगमाः सिराः प्राप्य शिरसि स्थिता दोषाः स्वहेतुकुपिताः कफपित्तवाताः कण्ठो
ष्ठतालुरसनादन्तकर्णनासालोचनशिरस्सु रुजः सृजन्ति॥८॥ दोषाः कण्ठादिषु रुजो विकारान् सृ
जन्ति कुर्वन्ति। कीदृशाः सन्तः स्वहेतुकुपिताः। स्वकीया हेतवः स्वकारणानि। तैः कुपिताः कोपं गताः। ते च
स्वहेतवो रूक्षैः शीतैः कैरित्यादिना पूर्वमुक्ताः। के ते दोषाः कफपित्तवाताः। ननु किमर्थं व्युत्क्रमेणोपन्यासः
कृत इत्युच्यते। वातपित्तजन्यस्यापि रोगस्य श्लेष्मणः चिकित्सा कार्येति ज्ञापनार्थं तत्स्थानं च वातस्तथा
कं चैकैकदोषस्थानगतं दोषसंस्थानिवशमुपाचरेदिति। किं रुचा दोषा रोगं कुर्वन्ति। शिरोमस्तकं सिरा निरू
पगम्य गवाक्षतरा सिराभिः ऊर्ध्वगमाभिः। ऊर्ध्वमुपरि गमो गमनं यासां ता ऊर्ध्वगमास्ताभिः। कण्ठादी नी॰टी॰
नामितरेतरद्वन्द्वः रसना जिह्वा रदा दन्ता एषां द्वन्द्वः आस्यं मुखं कण्ठादिसमवायं सर्वमुच्यते। लोच १४०
ने नयने। शिरः कपालमिति॥८॥ चक्षुः प्रधानं सर्वेषामिन्द्रियाणामिति रुचा तत्र विकारसंख्यामाह॥

चिकित्साप्रयोगा वाच्याः॥९॥ षट्सप्ततिर्लोचनजा विकारास्तेषामभिष्यन्दसमुद्भवानां श्लेष्माश्रयत्वादिति लंघ
नं प्राक् प्रशस्यते मुखरसौदनं च॥१०॥ लोचने अक्षिणी तयोर्जाता विकारा रोगास्ते च षट्सप्ततिर्विदेहादिभि
र्व्याख्याताः। तत्र दोषद्वारेण वातपित्ताभ्यां प्रत्येकं दश दश। श्लेष्मणस्त्रयोदश। रक्तेन षोडश। त्रिदोषजाः पं
चविंशतिः। बाह्यजौ च बाह्यौ द्वौ। एवं दोषद्वारेण षट्सप्ततिः। स्थानद्वारेण च। नव सन्धिषु। एकविंश
तिर्वर्त्मगाः। एकादश शुक्लभागे। चत्वारः कृष्णभागे। द्वादश दृष्टिमण्डले। सर्वलोचनाश्रयाः सप्तदश।
बाह्यजौ द्वाविति। तेषां सर्वेषामभिष्यन्दात् समुद्भवः। तथा चमुक्तं॥ प्रायेण सर्वे नयनामयास्तु
वं ध्यप्रभिष्यन्दनिमित्तमूला इति॥ तेषां श्लेष्माश्रयत्वादिति। श्लेष्मस्थानाश्रयत्वात्। श्लेष्मप्रत्यनीकं चि
कित्सितमाह॥ इति पूर्वोक्तकारणेन लंघनं च नशनं प्राक् प्रथमं प्रशस्यते। मुखरसेन यूषेणौदनेन
कं प्रशस्यत इति॥१०॥ अतः परं आश्च्योतनालेपनयोरवसरः॥११॥ आश्च्योतनेन त्रिफलारसेऽस

॥ कटुका कटुकी। त्रायंतिका त्रायमाणा। चंदनं रक्तचंदनं। दार्वी दारुहरिद्रा। यासो दुरालभा। एभिर्वास
कांतैस्तु सादिभिस्त्रिकार्षिकैः। कल्कैः सर्पिः प्रस्थं पक्वं पटोलादिकं पटोलाद्यं। स्रोत्रादिरुक्प्रशमनं
भवतीति॥ ७॥ पटोलाद्यनंतरं महात्रैफलं घृतमाह॥ ८॥ पथ्याक्षामलकीजले पयसि च छागे भवा
मारसे भृंगस्यापि रसे विपाचितं मिति। प्रोक्तैश्च कल्कौषधैः। काकोली त्रिफलामृतोत्पलकणा
द्राक्षासितायष्टिकाव्याघ्रीभिः सर्वनेत्ररुक्प्रशमनं सर्पिर्महात्रैफलं॥ ८ पथ्याक्षामलकीजलव
ति। पथ्या हरीतकी अक्षं बिभीतकं आमलकी। आमलकफलं एषां जले क्वाथे। क्वाथकल्पनाव
पथ्यादीनां चत्रिंशत्पलानि सलिलाढके निःक्वाथ्य चतुर्भागावशेषः क्वाथो भवति। अस्मिन् छा
गे पयसि छागदुग्धप्रस्थे समवामारसे। वासारसप्रस्थसहिते। भृंगस्यापि रसे। भृंगराजरसे
प्रस्थे। घृतप्रस्थं काकोल्यादिरष्टपलिकैः। कल्कौषधैः प्रोक्तैः सहपाचितं। काकोली प्रसिद्धा। त्रि

नी० टी०
१४२

फला फलत्रयं। अमृता गुडूची। उत्पलं नीलोत्पलं। कणा पिप्पली। द्राक्षा मृद्वीका। सिता शर्करा। य
ष्टिका यष्टीमधु। व्याघ्री कंटकारिका। नेत्ररुजो [illegible] षां प्रशमनं सर्पिर्घृतं महात्रैफलमिति॥
॥ ८॥ अधुना त्रिफलाघृतमाह॥ ९॥ क्वाथेन कल्कविधिना च फलत्रिकस्य पक्वं घृतं जयति नेत्ररुजः
समस्ताः। कुष्ठप्रमेहमुखकर्णकपालनाम्ना रोगान्भगंदरगतिव्रणगंडमालाः॥ ९॥ फलत्रिक
स्य त्रिफलायाः क्वाथेन त्रिफलापलशतं द्वात्रिंशत्सलिलद्रोणे प्रक्वाथ्य चतुर्भागावशेषेण। कल्क
विधिना च त्रिफलापलचतुष्टयं कल्कं तथा घृतप्रस्थं पक्वं नेत्ररुजो नेत्ररोगान्समस्तान् निःशेषा
न् जयति। कुष्ठादीन् गंडमालांतांश्च जयति॥ ९॥ इदानीं नेत्रातुरस्य क्रियापिंडमाह॥ ॥स्निग्धं
पटोलादिघृतेन सर्वं फलत्रिकाद्येन घृतेन वापि। नेत्रातुरं शुद्धविरिक्तरक्तमुपाचरेदंजनतर्प
णाद्यैः॥ एवंविधमं पटोलादिघृतेन त्रिफलकाद्येन वा नेत्रातुरं स्निग्धं ततः शुद्धं च विरिक्त

कं च शुद्धं विरिक्तं रक्तो शुद्धं विरेकादिना॥ विरिक्तं रक्तं पुत्तरकं त्वा अंजनतर्पणपुटपाकमेरुप
चरेदिति॥ ८॥ अधुनात्रयाणामपि वातादिकानां तिमिराणां त्रिफलाज्यमन्यत्पनीकत्वमाह॥ ८॥ तैले
न गव्यहविषा च यथाक्रमं माक्षिकेण संयुक्तया त्रिफलया तिमिरामयेषु वातादिजेषु भिषजः समुदाह
रन्ति संक्षेपतस्तिमिरभेषजमेतदेव॥ ८॥ वातादिजेषु वातपित्तश्लेष्मजेषु तिमिरेषु यथासंख्यं तैल
तैलगव्यघृतमाक्षिकैः संयुक्ता त्रिफला तिमिरभेषजमेतदाभिषजो वैद्याः समुदाहरन्ति। संक्षेपे
ण किं तु नेतः। किं बहुनेति॥ ८॥ इदानीं सुदर्शनांवर्तिमाह॥ ८॥ मरिचमागधिकामनःशिला
जलधिफेनककुंकुमशंखकैः। इति मनागरचंदनपत्रकैः पिष्टमितैः सरसांजनशुक्तिभिः॥ ९॥ नी०टी०
तिमिरवर्त्मरुगश्रुसमन्वितं जयति कंडुजकाकुलतारकं। मधुसमन्वितया निरुजं भवेत्तत्तर १४३
नया हि सुदर्शनयांजितं॥ मरिचादीनामितरेतरद्वंद्वः। मागधिका पिप्पली। अलं हरितालं। जलधि

फेनं समुद्रफेनं। नागरं शुंठी। चंदनं रक्तचंदनं। शेषाणि प्रसिद्धानि। एभिर्मरिचादिभिः पिष्टमितैः क
र्षमात्रैः प्रत्येकं। सरसांजनशुक्तिभिः। रसांजनार्द्धपलसंयुक्ता सुदर्शना वर्तिः। तद्वत्या मधुसमन्वित स०
या अंजितं निरुजं निर्गतरोगं भवेत्। यद्वितिमिरादिः समन्वितं। कंडूश्चांजकाचकं कंडुजके। ता
स्यामाकुलं तारकं यस्मिन्तत्तथा। तदप्यनयांजितं निरुजं भवेदिति॥ ९॥ इदानीं सौवीरांजनस्याति
शायनं तिमिरप्रत्यनीकतामाह॥ ९॥ भृंगोद्भवस्वरसभावितमाजदुग्धे मूत्रे गवां पयसि च त्रिफला
कषाये। द्राक्षारसेन परिशुद्धमिति क्रमेण सौवीरकांजनमिदं तिमिरामयघ्नं॥ १०॥ भृंगो मार्कवस्तत्र
तदुद्भवो यस्यासौ भृंगोद्भवः। स चासौ स्वरसश्च भृंगोद्भवस्वरसः। तेन भावितं च तत्। द्रवेण या व
तावद्रव्यमेकीभूय यावत्तां भजेत्तावद्भावनं निर्दिष्टं भिषग्भिर्भावनाविधौ। आजं छागं दुग्धं। तस्मिन्भा
वितं। गवां मूत्रे पयसि दुग्धे च गवामिति। त्रिफलाकषाये। द्राक्षारसेन स्वरसेन क्वाथेन वा। रस्ये

नक्रमेणएकैकेनवर्त्तीन्वारान्कदाचित्सप्त ॥ किंतत्सौवीरकांजनमिदं परिश्रुतं ॥ तिमिराम
यान्हंतीति ॥ ७ ॥ अधुना दिनांध्यनक्तांध्यहरी वर्त्तिमाह ॥ ७ ॥ आजं यत्कृगैरिकसंप्रयुक्तं किं तत्कमप्रसाद
पिचोत्पलाद्यादिनांध्यनक्तांध्यरोहरी प्रदिष्टा चतुर्भिरंगैरितिवर्त्तिरेषा ॥ १० ॥ दिनांध्यं दिवसांधत्वं नक्तां
ध्यं रात्र्यंधत्वं तेहरतीति दिनांध्यनक्तांध्यहरी वर्त्तिरेषा प्रदिष्टा कथिता इति ॥ चतुर्भिरंगैः कैः ॥ आ
जागं यत्कृत् हृदि दक्षिणपार्श्वाश्रितं मांसं गैरिकसंप्रयुक्तं संयोजितं ॥ अजात्परात्तत् किं तत्कं
पुष्पमध्यं उत्पलानीलोत्पलानि तत्किं तत्कमिति ॥ ७ ॥ इदानीं रात्र्यंधस्यैव प्रत्यनीकां वर्त्तिमाह ॥ ७ ॥ नी०टी०
हरेणुकां सैंधवसंप्रयुक्तां स्रोतोंजयुक्तां सुपकल्पयाच्च ॥ पिष्ट्वा जलेन हि ता वर्त्तिर्नक्तांध्यविध्वंसक
री नराणां ॥ ११ ॥ हरेणुका रेणुका तां सैंधवसंप्रयुक्तां ॥ योजितां ॥ स्रोतोंजं स्रोतोंजनं ॥ तेन युक्तां ॥ उपकुल्या १४४
पिप्पली तया च युक्तां ॥ आजं ॥ ७ ॥ गात्रस्य मूत्रेण पिष्ट्वा वर्त्तिः कृता नक्तांध्यं रात्र्यंधत्वं तस्य विध्वंसकरी नरा

णां प्राणिनामिति ॥ ७ ॥ इदानीं पित्तशुक्रयोरंजनमुवाच ॥ ७ ॥ मनःशिलालं त्रिकटु प्रदिष्टं पित्तापहं पि
त्तगदातुराणां ॥ समाक्षिकं चापि विभीतकस्य बीजं जयेत् शुक्रमथापि तापं ॥ १२ ॥ पित्तगदाविष्टस्तेनआ
तुराणां त्रिकटु मनःशिलालं सरसांजनं मधुयुतमंजनं पित्तापहं प्रदिष्टं कथितमिति ॥ विभीतकस्य अ
क्षस्य बीजं मज्जा समाक्षिकमंजनं शुक्रं जयेत् ॥ अथ वातापमपि अनुमान्यं किं समाक्षिकं शुक्रं जयेदि
ति ॥ ७ ॥ अधुना शुक्रादीनां लेख्यांजनमाह ॥ ७ ॥ चंदनं सिंधुसमुद्रवपथ्या किंशुकरक्तमिति क्रमदृष्टं ॥
क्षौद्रसमन्वितमंजनमस्तोः शुक्ररुगर्मगदादिविलेखि ॥ १३ ॥ चंदनादि चतुष्टयं क्रमदृष्टं चूर्णितं वा सौ
द्रसमन्वितमस्तोः रंजनं शुक्रादिविलेखि ॥ क्रमदृष्टं रक्तचंदनस्य कोषात् ॥ सिंधुसमुद्रवं सैंधव
तस्य फेनात् ॥ पथ्या हरीतकी तस्या मज्जा योजा गां ॥ किंशुकः पलाशस्तस्य रक्तं निर्यासस्तस्य च भागेन
गाः ॥ अंजनं च त्रिविधं ॥ गुटिकारसचूर्णभेदेन ॥ तत्र बलवतां रोगाणां पिष्टं यत् क्रियते पिंडवर्त्तिः गुटि

कान्ते देयं तन्तुटिकाञ्जनं॥ मध्यबलानां रोगाणां घनो रसो रसक्रियाञ्जनं॥ हीनबलानां रोगाणां शुष्कचू
र्णं शुष्काञ्जनं॥ पुनश्च त्रिविधं॥ लेखनरोपणप्रसादनभेदेन॥ तत्र लेखनमम्ललवणकटुतिक्तकषाय
भेदभिन्नं पंचविधं॥ सर्वाक्षिप्रयोक्तव्यं दृष्टिगतरोगनिवृत्त्यर्थं॥ रोपणं कषायतिक्तस्नेहनयुक्तमपराह्णे
प्रयोक्तव्यं॥ वातजरोगावजयार्थं॥ प्रसादनं मधुरं स्नेहसंयुक्तं रात्रौ प्रयोक्तव्यं॥ पित्तरोगशांत्यर्थमिति
रसक्रियाञ्जनं लेखनमेतत्॥ चंदनाद्यमिति॥ सर्वेषामेवाञ्जनानां स्पष्टा॥ लिंगेषु रोगेषु वमनादिशुद्धदेह
स्य नेत्रस्थे रोगे ऽवचारणं कर्तव्यमिति॥ तथा च सुश्रुतः॥ व्यक्तरूपेषु रोगेषु शुद्धकायस्य केवले॥ नी०टी०
नेत्र एव स्थिते दोषे प्राप्तमंजनमाचरेत्॥ शुक्ररुगर्मगदादि विलेख्यानि॥ शुक्ररुक् च अर्मगदाश्च शुक्र
रुगर्मगदाः॥ ते आदौ येषां ते तथा तान् विलिखितुं शीलं यस्य तत्तथा॥ अर्म पंचविधं प्रस्तार्यर्म शुक्लार्म १४५
रक्तार्म अधिमांसार्म स्नाय्वर्म संगृह्यते॥ आदिशब्देन उत्संगिनी बहलवर्त्म बद्धवर्त्म क्लिष्टवर्त्म पोथकी कुंभी

कर्दमवर्त्म श्यावर्त्म॥ ५-१

किनी शर्करा वर्त्मानां सर्वेषां विलेख्यानि॥ ५॥ इति नेत्ररोगचिकित्सा समाप्ता॥ ॥नेत्ररोगचिकित्सा
नंतरं यथोद्देशं नासागतरोगचिकित्सामाह॥ ना॥ हिंगुव्योषविडंगकट्फलवचारुक्तीक्ष्णगंधा
युतैर्जशिश्वेतपुनर्नवाकुटजजैः पुष्पोद्भवैः सौरसैः॥ इत्येभिः कटुतैलमेतदनले मंदे समस्तं स्थि
तं सतं नासिकया यथाविधि भवेन्नासामयेभ्यो हितं॥ २७॥ हिंग्वादी नामितरेतरद्वंद्वः॥ रुक्कुष्ठं
तीक्ष्णगंधा शोभांजनकः॥ श्वेतपुनर्नवा मि॥ णजा॥ कुटजजा इंद्रयवाः॥ पुष्पोद्भवैर्बीजैः कतरैः॥ सौ
रसैः सुरसबीजैः॥ शेषाणि प्रसिद्धानि॥ इत्येभिः प्रत्येकं द्विपलैः कल्कत्वेन चतुर्गुणं कटुतैलं॥ स्थितं अनले अग्नौ
मंदे तत्र नासिकया पीतं॥ नस्येन यथाविधि यथोदितो क्रमांगस्य षट्बलं बितरि रसस्याह॥ ॥
यथाविधिशब्देन आहिङ्गनामायामानया रोगा येषां ते नामामयिनस्तेभ्यो हितं भवेदिति॥ ॥इति
नासारोगचिकित्सा समाप्ता॥ ॥नासारोगचिकित्सानंतरं यथोद्देशं कर्णरोगचिकित्सामाह॥ ॥

